अनुमानदीधितिटीका मथुरानाथी

१५१०   ७१ पत्रै

पत्रे ७१

पुरुषोत्तमदेवस्येदं [illegible] ७१

[illegible]

॥ ॥श्रीगणेशाय नमः॥ ॥कुंचिताधरपुटेन पूरयन् वंशिकां प्रचलदंगुलिपंक्तिः ॥ मोहयन्नखिलवामलोचनाः पातु
कोपि नवनीरदच्छविः ॥ जगद्गुरोः श्रीरामस्य चरणौ मूर्ध्नि धारयन् । तनुते मथुरानाथो दीधितिं स्फुटयन्नयं ॥ निर्वि
घ्नं प्रारिप्सितग्रंथसमाप्तिकामनया कृतं भगवन्नमस्काररूपं मंगलं शिष्यशिक्षायै आदौ निबध्नाति नम इ
ति परमाय आत्मने नमः परमत्वमुत्कृष्टत्वं तच्च सर्वदर्शित्वजगदाराध्यत्वादिकमेव आत्मपदं तूक्तपावदर्थी
कं ननु आत्मत्वजातिविशिष्टपरं समवायिकारणतावच्छेदकत्वेन सिद्धाया आत्मत्वजातेर्भगवदात्मनि मान
भावात्त्वस्कृतस्कत्वाद्यवादात्मत्वजातेरेवात्मपदप्रवृत्तिनिमित्ततया भगवदात्मनि श्रोतात्मत्वेवहा
र एवात्मत्वे मानं न च श्रुतावात्मपदं ज्ञानादिमतिभाक्तमिति वाच्यं मुख्ये बाधकाभावेन लक्षणानुपपत्तेः
तथाचात्मत्वजातिविशिष्टपरमेव प्रकृते आत्मपदमिति तत्त्वं । स कीदृशस्तदाहाखंडेति अखंडो नित्यो आ
वीर नंदबोधो यस्येत्यर्थः आनंदः सुखं ईश्वरे स्वयमेव नित्यसुखस्य वक्ष्यमाणादेतदुक्तं यद्वा ऽखंडो ऽनवच्छिन्न आ
वाह आनंदो यस्मादेतादृशो बोधो यस्य षष्ठ्यर्थो विषयत्वं केचित्तु आनंदयति सुखं जनयतीत्यानंद इ
ईदृशादृ१

राम
॥१॥

स्विस्याङ्गः। पुनः कीदृशः सततदाहस्तर्प्ययेति स्वनिष्ठसुखदुःखाभावगोचरेच्छावदितिलायेत्यर्थः पुनः कीदृश
स्तदाह सर्वेति सर्वाणि भूतानि पृथिव्यादीनि विष्टभ्य वर्त्तति ष्ठतेसततेरित्यर्थः विष्टंभः संयोगविशेषः नन्वा
त्मनो विभुत्वेन विभुनाकाशेन सम्बन्धं कथं संयोगः विभुद्वयसंयोगानङ्गीकारादिति वाच्यं लाघवात्पृथि
व्यादिचतुष्टयवृत्तिजन्यद्रव्यसमवायिकारणतावच्छेदकस्य मूर्त्तत्वव्याप्यजातिविशेषस्य मूर्त्तत्वस्य भूतत्वस्य
वा भूतपदशक्यतावच्छेदकत्वेन पृथिव्यादिचतुष्टयस्यैव मुख्यभूतपदव्यवहारविषयत्वात् आका
शे भूतपदव्यवहारो हि बहिरिन्द्रियग्राह्यविशेषगुणवत्वनिबन्धनो ऽन्याकाशः यद्वेव भूतत्वं तद्देव मूर्त्तत्वं इति
पदार्थखण्डनेऽभिधानात्तस्मात् भूतपदाज्जातिविशेषप्रकारक एव बोधः बहिरिन्द्रियग्राह्यविशेष
गुणवत्वप्रकारकबोधस्तु लक्षणयेति शिरोमणेरपि संमतत्वात् यद्वा भूतपदं शरीरपरं पुनः कीदृश
स्तदाह तुर्यमिति चतुर्थं तमव्ययं ब्रह्मविष्णुशिवात्मने प्रणवप्रतिपाद्यायवेत्यर्थः इदानीं प्रस्तावत
प्रवर्त्तयेत्स्वग्रन्थस्येतरापेक्षया उत्कृष्टत्वमादर्शयन्स्वकीर्त्यनुवर्त्तयेत्स्वनामग्रन्थनामादौ निबध्नाति

री मद्दी॰ अ॰

२

2

अध्ययनेत्तिसारं तात्पर्यं अबाधितार्थो वा यद्यपि सारत्तित्यत्र बहुवचनमेवोचितं तथाप्येकवचनेनैकस्तान
रूढतासूचिता । अधिचिंतामणीति अव्ययीभावसमासः चिंतामणौ अधिकृत्यसंग्रहीकृत्येत्यर्थः । इ
दानीं ग्रंथस्य निगूढार्थत्वं स्वमात्रोक्तार्थकत्वं च दर्शयति परं त्विति अन्यैरसेविततर्कप्रतिपादिकेत्य
र्थः मननेति मननेन शास्त्राविरुद्धसूक्ष्मयुक्तिभिः पुनः पुनः परिशीलनेनास्वाद्योऽतिशयसुखजनको
रसोऽर्थो यस्याः सा तथा एवाप्रकृतग्रंथरूपाकृतिः कार्या । इदानीमात्मनो निगूढत्वं व्यंजनया प्र
तिपादयति न्यायमितिति निबंधग्रंथं अत्र न्यायदर्शने कुतुकादिस्पनेनात्तियोगाभावादपकर्षः सूचितः
अस्य न्यायदर्शनस्य रहस्यं निगूढार्थं केचन अनिर्वचनीयसामर्थ्याः ईशते समर्था नवंति इदानीं
विनयदर्शनपुरःसरं ग्रंथस्य निर्दोषत्वं व्यंजनया प्रतिपादयति मान्यानिति वच इत्येकवचनान्मम
एकमपि वचनं निपुणविभावनेनैव दृष्यमिति सूचितं निपुणं विभाव्येति निपुणविभावनेन स्वयमेव दो
षा अपसरिष्यंतीति भावः विहितउद्भावितः इत्युनोति दुःखं ददातीति अनुमाननिरूपणे कर्तव्ये सं

राम

॥२॥

१२

गतिप्रदर्शनस्य चैकप्रतिज्ञायाः प्रकृतानुपयोगित्वाद् अर्थान्तरं तेस्याशंकां परिजिहीर्षुस्तादृशप्रतिज्ञायाः प्रकृतोपयो
गितां प्रतिपादयति स्येवेति प्रतिजानीते उच्चैः शब्देन प्रतिपादयति संगतिप्रदर्शनविशिष्टप्रतिज्ञायाश्च यं
फलं एकवाक्यताप्रतिपत्तिः शिष्यावधानं च तत्र विशेषणांशस्य संगतिप्रदर्शनस्य फलं एकवाक्यताप्र
तिपत्तिः विशेष्यांशस्य प्रतिज्ञायाः फलं शिष्यावधानं एकवाक्यत्वं च मोक्षरूपैकप्रयोजनकप्रतिपत्तिकत्वं
तज्ज्ञाने च संगतिज्ञानं लिंगज्ञानविधया हेतुः यद्यत्संगतिमत्प्रतिपादकवाक्यं भवति तत्तत्प्रतिपादकग्रं
थज्ञानप्रयोज्यप्रयोजकप्रतिपत्तिविषयो भवति यथासन्निकर्षादिग्रंथ एवं प्रस्तुतस्य कार्यत्वेनैकका
र्यकारित्वादिसंगतिमत्प्रतिपादकवाक्यं भवति प्रस्तुतग्रंथज्ञानप्रयोज्यप्रयोजकप्रतिपत्तिविषयोपि न४
भवतीति न्यायः नन्वेतादृशैकवाक्यत्वप्रतिपत्तिसंगतिप्रदर्शनवत्प्रकृतोपयोगिनी स्यादर्थान्तरताद रपि ३
वस्थमिति वाच्यं तत्प्रतिपत्तेः प्रस्तुतग्रंथप्रयोज्यफलेच्छावतोऽनुमानग्रंथप्रवृत्त्यानुपयोगित्वादिति ॥
शिष्यावधानं च शिष्याणां विषयान्तरमनोविच्छित्तिः विषयान्तरज्ञाने द्वेषः इति यावत् भवति चास्यं तामिम

२
3

तात्पर्यज्ञानेऽन्यत्र देहे षष्ठ इति भावः केचित्तु एकवाक्यताप्रतिपत्तये संगतिं दर्शयन्तः शिष्यावधानाय प्रति ता
नीतइति प्रत्येककलपरतयायोजयन्ति तदसत्त्वकारासंगतेः त्रितिस्तेजो घटो वह्निरिति वत्कष्टा
न्वयापत्तेः प्रत्यक्षपदस्यवानयत्रैव प्रयोगात्प्रत्यक्षोपजीवकत्वादित्यत्र प्रत्यक्षपदमनुनयप
४अ रतयैव व्याचष्टे अत्रेत्यादिना अत्र अस्मिन् ग्रंथे प्रतिपाद्यत्वं सप्तम्यर्थः प्रत्यक्षोपजीवकत्वादिति त्रिये राम
यप्रतिपाद्योपजीव्योपजीवकत्वावच्छिन्नइत्यर्थः उपजीवकतायास्तु उपजीव्यकत्वरूपाया उपजीव्य ॥३॥
अ४ ताघटितत्वेन उपजीव्यताया अप्येतद्ग्रन्थप्रतिपाद्यत्वेनानुपपन्नमिति मतम् तयाच प्रत्यक्षफलोप
जीवकत्वादनुमानफलस्येति प्रत्यार्थ इति भावः गुरुवस्तु ज्ञायमानलिंगस्या नुमानत्ववादिनये प्र
त्यक्षोपजीवकत्व [illegible] यावता मनुमानेऽप्यागासिद्धमतस्तन्मे
तसाधारत्वपार्यमाह फलत्व इति लिंगज्ञानमेवानुमानमिति शुद्धमतेनाह स्वरूपतश्चेतीति प्राहुः

नचफलयोरुपजीवकत्वं कथमनुमानप्रमाणे संगतिः अनुमानासंबंधत्वात् अनुमानजिज्ञासायामप्र
कारत्वाच्चेतिवाच्यं स्वाश्रयकरणत्वात्मकपरंपरासंबंधेन। तस्यानुमानगतत्वात् अनुमानजिज्ञासायां
प्रकारत्वाच्चेतिभावः ननु फलतउपजीवकत्वेन संगतिः अनंतराभिधानव्याप्याहि संगतिः नचोपजीवक
त्वं तथा नहि यद्यत्फलोपजीवकफलकं तत्तन्निरूपणानंतरं निरूप्यमिति परंपरया नियमः पर्यव
सितः संभवति प्रत्यक्षफलस्यानुमानफलोपजीवकत्वेपि प्रत्यक्षस्यानुमाननिरूपणानंतरनिरूप्य...
नुमाननिरू त्वाभावेन व्य निवारादिप्सतं आह प्रत्यक्षफलस्येति इंद्रियफलस्येत्यर्थः अनुव्यवसा
यादेरित्यादिनाऽनुमित्युपनीतधर्मसाक्षात्कारस्यानुमित्यात्मकविशेषणज्ञानजन्यविशिष्ट
ज्ञानादेश्चपरिग्रहः॥ अनुमित्युपजीवकत्वेपीति एकत्र विषयतयाऽन्यत्रज्ञानलक्षणसन्निकर्षादिविधयाऽ
नुमितेर्हेतुत्वादितिभावः नसर्वेति प्रत्यक्षप्रमितित्वावच्छिन्ने त्यर्थः तथाऽनुमित्युपजीविका अयं घट

मन्दी

४

वादितिभा ।

बा ४

इत्यादिसाक्षात्कारणमनुमित्युपजीवकत्वाभावः तथा च प्रमाणफलविभाजकोपाध्यवच्छिन्नमुपजीव

५ कत्वमेव संगतिः ॥ अवच्छिन्नत्वं च व्यापकत्वं तच्चानंतराभिधानत्र्याप्यमेव न ह्येतादृशोपजीवकत्वम

स्या३ नुमितेः साक्षात्कारे स्तीयनम्यनिवार्यं दितिभावः नन्वेतादृशसाक्षात्कारोपजीवकत्वमनुमिता

वपि नास्ति विनापि व्याप्त्यादिप्रत्यक्षं शा दिपरामर्शादनुमित्युत्पत्तेरिति कथमुपजीवकमत्र परं राम

५अ संगतिरित्यत आह । अनुमियस्त्विति उपजीवकत्वं साक्षात्परासाधारणप्रयोज्यत्वं तच्च शाब्दादि

परामर्शजानुमितावपि परंपरया पदादिसाक्षात्कारस्य प्रयोजकत्वादक्षतमिति भावः नन्व ॥५॥

तथापि प्रत्यक्षोपजीवकत्वमात्रं मूलकृता संगति[illegible]भिहितं तदसंगतमेवेत्यत आह । पुरस्कृ

तश्चेति अयं उक्तधर्मावच्छिन्नत्वरूपः । उपजीवकतोत्कर्ष उपजीवकतानिष्ठं वैलक्षण्यं पुरस्कृ

तः ग्रंथकृतापि तात्पर्यविषयीकृतश्चेत्यर्थः । उपजीवकत्वशब्दस्य लक्षणया तद्विशेष

परत्वादितिभावः न सर्वाप्रत्यक्षमिति स्वयोत्युक्तं दूषयति यद्यपीति । समयः वेदादिवाक्य

स्वपदशक्तिंमत्कर्त्तव्यतांमत्कृतिसाध्यताआदिपदयोर्लक्ष्यतात्पर्यं इष्टसाधनत्वं इदानींनमत्कृतिसा
ध्यत्वंचेतिपरिच्छेदिकांविषयितांअनुमितिप्रकारस्य इदंपदमत्रशक्यं लक्षणा तानाजन्यं प्रमाजन्य एतच्छाब्द
धीजनकत्वात् इदं मत्कृतिसाध्यंमत्कृतिं विनाऽसत्त्वे सति सत्त्वात् इदंपदं एतत्तात्पर्यकं एतदन्या
तात्पर्यकत्वे सति तात्पर्यकत्वात् इदमेतत्साधनं एतत्कर्म इष्टसाधनतयावेदबोधितत्वात् इदं
इदानींतनमत्कृतिसाध्यं तादृशकृतिरूपप्रयुक्तव्यतिरेकप्रतियोगित्वादित्यादयोऽप्यत्र सामान्य
व्याप्तिमूलकाः अवसेयाः अयंभावः कार्यमात्रेऽदृष्टस्य हेतुत्वात् जन्यसाक्षात्कारे च इष्टं हेतुः तत्र या
गादिक्रियाहेतुः तत्र प्रवृत्तिर्हेतुः तत्र क्रियागतेष्टसाधनकृतिसाध्यताधीः सा च वेदात् भवंती शक्तेस्ता
त्पर्यस्य चानुमानमपेक्षते तयोः प्रायशोऽनुमेयत्वात् किंच वर्तमान कृतिसाध्यतायाः इष्टविशेष
साधनतायाः धीरेव प्रवृत्तेर्हेतुः सा च न वेदतः संभवति विधेः सामान्यत एव कृतिसाध्यत्वेष्टसा
धनत्वशक्तत्वात् किंतु अनुमानत एवेति जन्यसाक्षात्कारमात्र एव परंपरयाऽनुमिते[illegible]रेति

म.टी
५

निखिल १

ध्येयं। ननु लिङ्गनिष्ठत्वस्य हि फलस्याप्यनुमितिमुपजीवकत्वेऽपि न प्रमाणफलविभाजकोपाध्यवच्छिन्नानुमितिमुपजीवक
त्वं साक्षात्कारे साक्षात्कारत्वं हि तद्विभाजकोपाधिः स तु नोपजीवकतावच्छेदकः ईश्वरसाक्षात्कारे
तदनुपजीवकेऽपि सत्त्वादित्यत आह ईश्वरेतितथा च साक्षात्कारत्वं न प्रमाणफलविभाजकमतिप्रस
क्तत्वात् पितु जन्यसाक्षात्कारत्वमेवेति भावः दृष्टे [illegible] यद्यपि अदृष्टद्वारकस्यापि अनुमानस्य शरीरा
दिदृष्टद्वारकत्वमस्त्येव तथापि दृष्टमात्रद्वारकत्वे अदृष्टाद्वारकत्वरूपे तात्पर्यमित्यदोषः इह अनुतथात्वे मितोप
उक्तधर्मावच्छिन्नमुपजीवकत्वं आरणीयं अनंतराभिधानप्रयोजकतया आहरणीयं ननु अदृष्टाद्वा राम
रकत्वे सति सद्वारकोपजीवकत्वमेवास्त्विति यत्नाकृतं प्रमाणफलविभाजकोपाध्यवच्छिन्नादिप्रवेशेना ॥५॥
नुमित्यनुव्यवसाये द्वारमभावादेव अव्यभिचारादित्यत आह इतरस्येति सद्वारकोपजीवकत्वमात्र
स्यार्थः अवितिगत्वादिति साध्यवत्त्वेव न तु साध्याभाववतीति विनिगमनाया अविषयत्वात्
द्वितीय अनुमित्यनुव्यवसाये अनुमितत्वधर्मविशिष्टप्रत्यक्षजसाक्षात्कारे च व्यभिचारादिति भावः
अदृष्टाद्वारकत्वे सति ३

ननु तथापि स्वरूपत उपजीवकत्वं कथं संगतिः अनंतराभिधानाव्याप्यत्वात् नहि यत्र यदुपजीवकं भवति तत्तन्निरूपणानंत
र निरूप्यमिति नियमः संभवति इंद्रियात्मकप्रत्यक्षस्य उत्क्रमेण इच्छाद्वारा अनुमानोपजीवकत्वेपि तन्निरूपणा
नंतरनिरूप्यत्वाभावेन तत्र व्यभिचारादित्यत आह सर्वं वेति इंद्रियापेक्षेति व्याप्तिबुद्धेरेवानुमितिकरणत्वेन तस्याः त्या
सर्वस्या एव साक्षात्परंपरयेंद्रियोपजीवकत्वादित्यर्थः तथा च यत्किंचित्प्रमितिविभाजकोपाध्यवच्छिन्ननि
रूपितकरणत्वावच्छेदेन स्वरूपत उपजीवकत्वमेव संगतिः तच्चानुमाने एवास्तीति न लिंङ्गियात्मकप्रत्यक्षप्र
माण इति न व्यभिचार इति भावः। इदं च मनसोऽनुमितिकरणत्वानंगीकारेणान्यथात्वसंगतेरिति ध्येयं नन्वी
श्वरीयव्याप्तिज्ञानस्यानुमितिकरणस्येंद्रियानुपजीवकत्वात् सर्वस्यानुमितिकरणस्य कथं तथात्वमित्य
त आहानुमितिमिति मा वयतोऽज्ञनयतः तत्करणेति अनुमितिकरणेत्यर्थः प्रत्यासत्त्येति व्यापारीभू
तपरामर्शसामानाधिकरण्यरूपेत्यर्थः अस्मदादनुमितिकरणत्वाभावात् एकस्य व्याप्तिज्ञाने परस्य परा
मर्शानुत्पत्तेः सामानाधिकरण्यप्रत्यासत्त्येव तयोर्हेतुमद्भावेन व्यापाराभावादिति भावः नवत तथापि ज्ञान

था२ हेतु१

मञ्जी
६
6

त्वेन कार्य्यत्वेन कार्य्यकारणभावाद्यधिकरणेपि अस्मदादि[दि१]परामर्षस्तद्व्यापार इति वाच्यं व्यापारत्वस्योऽसाधारणज्ञ
न्यताया एव प्रवेशात् यत्तु प्रत्यासत्तिः अनुमित्यात्मकफलसामानाधिकरण्यरूपेति तदसत् व्याप्तिज्ञानानु
मित्योः सामानाधिकरण्यप्रत्यासत्त्या हेतुहेतुमद्भावे मानाभावात् एकस्य परामर्शेपि व्याप्तिज्ञानवतः परामर्श
विरहिणोऽपरस्यानुमितेरनुत्पत्ते रपरस्यानुमितेरनुत्पत्तेरवश्याभ्युपेयेन परामर्शानुमित्योः सामाना
धिकरण्यप्रत्यासत्त्या हेतुहेतुमद्भावेनैवातिप्रसंगभंगात् न च तत्र व्यापारसंबंधेन व्याप्तिज्ञानाभावान्ना
नुमितिरिति वाच्यं। व्यापारसंबंधेन व्याप्तिज्ञानस्य कारणत्वकल्पनामपेक्ष्य समवायसंबंधेन परामर्शका राम
रणत्वकल्पनाया एव लघुत्वात् न च करणस्य व्यापारसंबंधेनैव कारणत्वमिति नियम इति वाच्यं अप्रयोज ।।६।।
कत्वात् ननु सामानाधिकरण्यप्रत्यासत्त्याजनकत्वं सामानाधिकरण्ये कार्य्यदिशियः संबंधः तेन संबंधेन
कार्योत्पत्त्यधिकरणे देशनिष्ठाभावस्य कारणदिशियः संबंधस्तत्संबंधावच्छिन्नप्रतियोगितायाः
नवच्छेदको योऽन्यथासिद्धनिरूपको धर्मस्तद्वत्त्वं तथा च व्याप्त्यादिकं प्रति अरण्यस्थदंडानामिव परामर्ष

तो२ स्वर

असमानाधिकरणस्यापि भगवज्ज्ञानस्य परामर्शप्रतिजनकत्वमव्यवहितं व्याप्तिज्ञानत्वस्य तादृशप्रतियोगितानव
च्छेदकस्य तत्रापि सत्त्वात् अथ नित्यस्य स्यादि नियमात् ईश्वरज्ञानस्य स्वरूपयोग्यत्वे फलोपधानापत्तेः जन्य
व्याप्तिज्ञानत्वमेव तादृशो धर्मस्तच्च नेश्वरज्ञाने नवेश्वरज्ञानमपि असम्भवादिति छपरामर्शरूपेण फले
नफलोपहितमेवेति वाच्यं कारणतानिर्वाहकसंबंधेन फलानुपहितत्वात् तत्र व्याप्नोतथैव तिवेशात् अन्य
ता थात्वनियमापत्तेरिति चेन्न अनुकूलतर्कविरहेण कारणतावच्छेदकगौरवप्रसंगप्रतिकूलतर्केण
च तादृशनियमासिद्धेः किं च प्राचां मतेपि नित्यस्य स्यादिना नियमे तादात्म्यसंबंधेन स्वरूपयोग्यत्वमेव
प्रविष्टमत एव समवायिकारणस्थलेऽप्येवं तादृशव्याप्तिमुद्भावयंतीमेवं भवतु नर्गावती बुद्धिः सामा
नाधिकरण्यप्रत्यासत्त्या परामर्शप्रति अनुमितिमिति च स्वरूपयोग्यतयापि फलोपधायकत्वरूपकर
णत्वस्यैवात्र पुरस्कारात् न काप्यनुपपत्तिः ग्रंथस्तु एवं योजनीयः तत्कारणतानिर्वाहकेति अनुमि
तिकरणतानिर्वाहिका या व्यासक्तिः स्वासाधारणोपधायककव्यापाररूपा तद्विरहेण अमतत्वात् अ

मणि
७

नुमितिफलोपहितकरणत्वस्यानुभूतत्वात् परकीयव्याप्तिबुद्धौ परकीयानुमितेः फलोपधायककरणत्वाभावेन तज्ज्ञानत्वेना
नुमितित्वेन कार्यकारणभावाद्धूमलिंगकानुमितिजनकीभूतस्यापि वह्निमल्लिंगकानुमितिसमानाधिकरणस्या
लोको वह्निव्याप्य इतिज्ञानस्य तदनुमितिफलोपहितकरणत्वाभावेन च तादृशप्रत्यासत्तेरेव फलोपधाय
ककरणतानिर्वाहकत्वस्यावश्यंवाच्यत्वादिति भावः यथोक्तमुपजीवकत्वमनुमानस्य प्रत्यक्षेनास्तीत्याह सर्व
मिति नन्विदमयुक्तं मनसोप्यनुमितिकरणतया अनुमितिकरणत्वावच्छेदेनापि प्रत्यक्षोपजीवकत्वाभावात् किं
चैतादृशोपजीवकत्वस्यैव संगतित्वे उपमानोपजीवकतया शब्दनिरूपणं न संगच्छेत शाब्दतत्करणत्वावच्छे रामा
देन उपमितितत्करणोपजीवकत्वाभावात् व्यवहारादितो पि शक्तिग्रहाद्युपपत्तेरित्यत आह दृष्टद्वारेति ॥७॥
पूर्ववद्दृष्टद्वारेत्यर्थः तत्त्वं स्वरूपत उपजीवकत्वं आदरणीयं संगतित्वेनादरणीयं। तादृशं चानुमानोपजीवक
त्वं प्रत्यक्षेनास्तीत्याह न चेत्यासत्तिमदपीति तथा च प्रत्यक्षत्वा सामानाधिकरण्येनापि तथोपजीवकत्वं नास्ती
ति भावः यद्यपि इष्टसाधनतानुमितिहेतुकप्रवृत्त्यादिक्रमेण घर्षणादिना जनितायां चक्षुरादिव्यक्तौ प

रं परया दृष्टद्वारकानुमानोपजीवकत्वसत्वात्प्रत्यक्षत्वसामानाधिकरण्येनादृष्टाद्वारकानुमानोपजीवकत्वमस्त्ये
व नच दृष्टद्वारकं जन्यत्वरूपमुपजीवकत्वमेव संगतिरिति वाच्यं अदृष्टाद्वारकविशेषणवैयर्थ्यापत्तेः मनःसंयोगस्या
पि प्रत्यक्षप्रमितिकरणत्वेन प्रत्यक्षप्रमाणांतर्गतत्वेन तस्यैवादृष्टद्वारा मनोरूपानुमानजन्यतया प्रत्यक्ष
प्रमाणत्वसामानाधिकरण्येन जन्यत्वरूपस्याप्यनुमानोपजीवकत्वस्य सत्वाच्च तथापि एतदभिप्रायेणैव
दूष्यं चोपजीवकतायास्तत्स्वत्वेपि न क्षतिरित्यादिनानुपदं स्वयमेव वक्ष्यमाणत्वाददोषः तच्च तत्रैव स्फुटीकरि
ष्यामः उपजीवकमिति एवंविधमित्यादि इति न नियमः इत्यपि न नियमः विशिष्टं यमस्यैव पूर्वमभिधानात्कार्य
मिति एवंविधेत्यादि तथा चाकारणमनिरूप्याप्येवंविधकार्यनिरूपणाद्व्यभिचार इति भावः तद्यथा अदृष्टाद्वा
रा यद्यज्जन्यं तत्तन्निरूपणानंतरनिरूप्यमिति नियमेऽनुमितिप्रभृतिषु व्याप्तिज्ञानपक्षतादिकार्येषु तन्नि
रूपणात्प्रागेव निरूपितेषु स्फुट एव व्यभिचार इति किं चातः इति एतादृशनियमाभावे किमनिष्टमित्यर्थः न
हीति उपजीवकत्वेऽप्रसंगस्य त्वयैव दर्शितत्वात्कारणत्वादावप्यप्रसंगाच्चेति भावः अनंत[illegible]ति तत्सन्निधानानंत

मुकी
मणी
८

एतदभिधानप्रयोजिकाया जिज्ञासा तज्जनकज्ञानविषयोऽर्थः तस्य तत्र संगतिरित्यर्थः भवति च प्रथमं प्रत्यक्षज्ञानं त
तः प्रत्यक्षकार्यस्मृतिः एकसंबंधिज्ञानस्यापरसंबंधिस्मारकत्वात् ततः प्रत्यक्षकार्यज्ञानत्वेन प्रत्यक्षकार्यज्ञा
नस्य ज्ञाने ततः परकीयप्रत्यक्षकार्यज्ञानादाविष्टसाधनताज्ञानात् परस्य प्रत्यक्षकार्यज्ञानं भवतीति ग्रंथकर्त्तुस्तत्रे
च्छा सैव च जिज्ञासा तत्र इष्टस्य परकीयप्रत्यक्षकार्यज्ञानस्य साधनतया प्रत्यक्षकार्यबोधकवाक्यस्य ज्ञाना
त् तत्रेच्छा ततः इष्टस्य तादृशवाक्यस्य कंठाभिघातादेः साधनताज्ञानात् कृतिसाध्यताधीसहकृतात् तत्र चिकीर्षा जा का ५
यते तत्र प्रवृत्तिः ततः कंठक्रियादिक्रमेण कंठाद्यभिघातात् प्रत्यक्षकार्यबोधकवाक्यजन्म तस्य च वाक्यस्या राम
नंतराभिधानात्मकस्य परंपरया प्रयोजिकायाः प्रत्यक्षकार्यज्ञानं भवतीत्याकारायाः उक्तजिज्ञासाया जनकस्य प्रत्य सा० ११८२
क्षकार्यज्ञानेष्टसाधनताज्ञानस्य विषयः प्रत्यक्षकार्यत्वमिति तस्य संगतित्वमिति लक्षणसमन्वयः एव
मन्यत्रापि यद्यपि परकीयज्ञानगोचरेच्छा न जिज्ञासापदार्थः इच्छतिनैककर्तृकाद्धातोरेव सन्प्रत्ययानुशा
सनात् स्वज्ञानगोचरेच्छाया एव तत्वात् तथापि जिज्ञासात्मक एवाखंडो ज्ञानसामान्यगोचरेच्छावाची रूढः

का २

शब्दे प्रवर्त्ततेस वात्र प्रविष्टइतिनानुपपत्तिः अत्रोदासीनघटादिसाजिसासामान्यजनकस्य घटज्ञानमिष्टसाधन
मित्यादिज्ञानस्य विषयेऽर्थेऽतिव्याप्तिवारणाय प्रयोजकांतंनवसामान्यतएवानंतराभिधानप्रयोजकमित्याद्ये
वास्तु किंतत्रेदं तर्भावेनेतिवाच्यंतथासतिपक्षताकार्यकारिकिमितिजिज्ञासयानिरूपितपरामर्षे पक्षताकार्यका
रित्वं पक्षतायाः संगतिवदीश्वरज्ञानस्यापिसंगतिः स्यात् ईश्वरज्ञानस्यापितत्कार्यकारिताश्रयत्वात्तवनवत
दनंतराभिधानप्रयोजनकेस्यादितस्यसंगतिरित्येवास्तु किं द्वितीयतत्पदेनेतिवाच्यंतथासतिप्रस्यक्षोपजी
वकत्वंशब्दावपि वर्त्तमानंशब्दावपिसंगतिः स्यादितिनचैवमपिव्याप्तिपक्षतयोर्द्वयोर्निरूपणानंतरं
त्रपक्षतयैवपक्षताकार्यकारितयापरामर्षस्मारितस्ततः पक्षताकार्यकारिकिमितिजिज्ञासयापरा
मर्शो निरूपितस्तत्र पक्षताकार्यकारित्वंव्याप्तेरपिसंगतिस्यादिति वाच्यं अर्थपदस्ययन्निरूपणानं
तरमभिधानंतदुज्ञानजन्यानंतराभिधेयस्कृतिप्रकारपरत्वात्तज्ज्ञानजन्यस्वप्रकाशानंतराभिधेयस्कृ
तिप्रयोज्यायाताद्दशजिज्ञासायाजनकज्ञानविषयः संगतिरितितुसमुदितार्थः (स्वपदंतस्यपरंतेनयदा

म॰टी
६

व्याप्तिज्ञानात्पक्षताकार्यकारितयापरामर्श

कदाचित्स्मरणेऽपि न क्षतिः यदानुव्याप्तिज्ञानजन्यपक्षताकार्यकारित्वप्रकारकस्मृतिप्रयोज्यजिज्ञासयाप
रामर्शो निरूप्यते तदा तन्नु वक्ष्यमाणव्याप्तेरपि संगतिः प्रसंगएवांतर्भावात् न चांतराभिधानप्रयोजकज्ञानवि नं
षयोऽर्थ इत्येव सम्यक् किं जिज्ञासाजनकत्वनेनेति वाच्यं प्रत्यक्षकार्यज्ञाने इष्टसाधनतानुमितिजनकस्य ता
दात्म्येन प्रत्यक्षान्वयव्यतिरेकानुविधायिज्ञाना[illegible]लिंगविशेषकव्याप्तिज्ञानस्य विषयेप्रत्यक्षान्वयव्यति
रेकानुविधायित्वाद्धेत्वप्रत्यक्षस्मारितेवातिप्रसंगात् अत एवानंतराभिधानप्रयोजकजनकज्ञानविष राम
योऽर्थ इत्यपि परास्तं उक्तव्याप्तिज्ञानस्यापि अनंतराभिधानप्रयोजके इष्टसाधनतानुमितिजनकत्वात्
अत एव जिज्ञासाजनके तूक्ते ननु जिज्ञासाप्रयोजके तिन वांतराभिधानप्रयोजके जनकेऽपि वा व्यक्तां किं जि नं ॥६॥
ज्ञासाजन[illegible]नुपपत्तिनेति वाच्यं तादृशजिज्ञासाजनकतयाप्रयोज्यकायाप्र नं
त्यक्षकार्यज्ञानीयफले छायाजनकस्यापि विषयेतिप्रसंगात् ज्ञानपदं च तादृशजिज्ञासाजनकफले छावि
षयेऽतिव्याप्तिवारणाय अयप्रत्यक्षकार्यज्ञानमिष्टसाधनमित्याकारस्य जिज्ञासाजनकज्ञानस्य विष

नुधावने ३

यदिच्छेष्टसाधने[illegible]त्वादौ ज्ञानज्ञानत्वप्रत्यक्षकार्य्यप्रत्यक्षत्वादौ वातिप्रसंगः । न च तादृशज्ञानविषयत्वं तादृशज्ञान
स्य विषयतासंबंधेन धर्मितावच्छेदके विशेषणविधया विषयत्वं विवक्षणीयं न वतितादृशज्ञानस्य विष
यतासंबंधेन धर्मितावच्छेदके प्रत्यक्षकार्य्ये विशेषणविधया विषय इति वाच्यं । तथा सति यत्र प्रत्यक्षे कार्य
प्रमेयत्वज्ञानगुणत्वाद्यवगाहि प्रत्यक्षकार्य्यज्ञाने ष्टसाधनत्वज्ञानात् समूहालंबनरूपात् प्रत्यक्षकार्यजिज्ञा
सातया प्रत्यक्षकार्यनिरूपणं । तत्र प्रमेयत्वादेः संगतित्वापत्तेरिति चेन्न । यद्धर्मविशिष्टविषयकज्ञानेष्टसाध
नताज्ञानत्वेन तादृशजिज्ञासाजनकं तादृशोर्थ इति विवक्षितत्वात् न चैवं तादृशप्रयोजकेच्छैस्य वास्तकत्ते
जिज्ञासापर्य्यवसानानुधावनेन । ज्ञानेष्टसाधनताज्ञानस्यापेक्षा । प्रत्यजनकत्वादिति वाच्यं । तद्धर्माभाये वतद
नुधावनात् न च तथापि नीलत्वेन द्रव्यत्वेन च समूहालंबनजिज्ञासया । यत्र नीलो घट इत्यभिहितं । तत्र द्रव्य
त्वेति प्रसंगा इति वाच्यं अनंतराभिधानप्रयोजकताजिज्ञासा यायेन रूपेण तद्रूपावच्छिन्नजिज्ञासावृत्ति का
र्यताप्रतियोगिककारणताया एव निवेशात् । उक्तसमूहालंबनजिज्ञासायाश्च नीलो घट इत्यभिधानं प्र

प्र॰टी॰
१०

तस्या आनंतर्याभिधानप्रयोजकत्वादि
तिवाच्यं

तिद्रव्यत्वजिज्ञासात्वेनाप्रयोजकत्वात्तज्जिज्ञासायाश्चोपयोगो हि। वाक्येच्छासंपादनद्वारा सा येन रूपेण यत्र
साधनताज्ञानमपेक्षते। तेनैव रूपेण तदिच्छामर्पि नीलो घट इति वाक्येन। नीलज्ञानत्वेन नीलज्ञानजनकताग्र
हान्नीलज्ञानत्वेन। ज्ञानेच्छाया उपयोगो न तु द्रव्यज्ञानत्वेनापि। यदा च नीलो घट इति वाक्ये द्रव्यज्ञानत्वेन ज्ञान
जनकताग्रहोपि तदानवस्थैव द्रव्यत्वमपि तत्र प्रसंगरूपा संगतिः। अत एव तात्पर्यनिर्वाहाय नीलपदस हा४
मानाद्रव्यत्वविशिष्टे लक्षणापि न स्वीक्रियते। प्रामाणिकैः न च प्रसक्तकार्यजिज्ञासैव यत्र फलेच्छाविषया
प्रसक्तकार्यत्वजिज्ञासया जनिता तत्र प्रसक्तकार्योऽतिप्रसंगः प्रसक्तकार्यजिज्ञासाद्वारा आनंतर्याभि राम
धानप्रयोजकत्वं हि तदभिधानोपधायकतदभिधानेच्छाजनकत्वं भवति च प्रसक्तकार्यजिज्ञासा तद ॥२०॥
दभिधानोपधायकतदभिधानेच्छाजनिकाऽपायेऽपि प्रतिफलेच्छायाजनकत्वात् प्रसक्तकार्यत्वजिज्ञा
सायाः तत्तदभिधानेच्छायाजनकत्वं भवति च प्रसक्तकार्यजिज्ञासायाः न त्वेवमनुमानज्ञाने भवतु इ
ति जिज्ञासया तन्निरूपणेऽनुमानत्वमपि संगतिः स्यात् तथा च प्रसंग उपोद्घातो हेतुतावसरस्तथा

सं१ ने२

वजनतदभिधानेच्छाजनिका तस्याः प्रसक्तकार्यजिज्ञासात्वं प्रयोजकतेत्य२

निर्वाहकैककार्य्यत्वेषोढासंगतिरिष्यते इति विभागो व्याहन्येत हेतुता कार्य्यकारणभावः निर्वाहकत्वं यथा कथंचिद
नुकूलत्वं एककार्य्यत्वं एककार्य्यत्वानुकूलत्वं इति चेन्न प्रसंग एवांतर्भावात् कार्य्यत्वाद्यन्यसंगतित्वस्यैव प्रसंगत्वात्
स्मृतस्योपेक्षानर्हत्वं प्रसंग इति प्राचीनगाथायाः अपि उपेक्षानर्हस्मृतिप्रकारे धर्मे इत्यर्थः उपेक्षानर्हत्वं तु अ
नेतराभिप्रयोजकत्वं स्मृतिः स्वकार्य्यत्वाद्यप्रकारिका ग्राह्या तथा च उक्त एवार्थः पर्य्यवसितः उपोद्घातोपि प्र
कृतोपपादकत्वरूपा संगतिरेव एतदुपपादकज्ञानं न वत्विति जिज्ञासयैव उपपादकाभिधानात् चिंतां
प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः इत्यस्यापि प्रवादस्य चिंताविषयीभूते प्रकृतोपपादकत्वमर्थः किं
मा ज्ञानस्य जिज्ञासां प्रति प्रायसो हेतुत्वात् चिंतावानंतराभिधानं प्रयोजकजिज्ञासाजनिका ग्राह्येति न संगतित्वे
सति प्रकृतोपपादकत्वमर्थ एव पर्य्यवसितः न च प्रकृतोपपादकत्वमेव उपोद्घात उच्यतां कृतं संगतित्वनिवे
ने शें तिवाच्यं यदुपपादकत्वप्रकारकजिज्ञासया किमपि न निरूपितं तत्रासंगतावतिप्रसंगापत्तेः एवं च कार्य्य
त्वादीन्यपि संगतित्वविशेषितान्येव ग्राह्याणीति यत्तु कार्य्यत्वाद्यन्यतमत्वं तत्तत्कार्य्यत्वाद्यन्यतमत्वं वा संग

प्र॰टी
११

तित्वमिति तन्न सर्वस्य कार्य्यत्वादेः सर्वत्र संगतित्वापत्तेः प्रमेयवज्ज्ञानेनवलितिति जिज्ञासयायत्र प्रमेयवत्त्वनिरूपितं तत्र प्रमे
यमात्रस्यैव संगतित्वेन ताहृशान्यतमाप्रसिद्धिश्चेति संक्षेपः। कार्य्यत्वे कारणत्वं च संगतिलक्षणं ग्राहयति ज्ञाय
ते चेति कारणत्वस्य कार्य्यत्वस्य चेति प्रकारिता षष्ठ्यर्थः किमस्य कार्य्यं कारणं वेति तज्ज्ञानादिति शेषः तथा
च कार्य्ये ज्ञाते कारणत्वेन प्रकारेण कारणस्याज्ञानात् किमस्य कारणं तज्ज्ञानादिति जिज्ञासा कारणे वाज्ञा
ते कार्य्यत्वप्रकारेण कार्य्यस्याज्ञानात् किमस्य कार्य्यं तद्वाज्ञानादिति जिज्ञासेत्यन्वयः तयोः कार्य्यकारणत्व राम
योः उत्थं चेति संगतेरनन्तराभिधानाव्याप्यत्वेन चेत्यर्थः उपजीवकतायाः प्रत्यक्षनिष्ठायाः स्वरूपतोऽनुमानो
पजीवकतायास्तुल्यत्वेपीति अनुमाननिष्ठस्य स्वरूपतः प्रत्यक्षोपजीवकत्वस्य तुल्यत्वेपीत्यर्थः न हृतिः ॥१२॥
स्वरूपतः प्रत्यक्षोपजीवकत्वस्य संगतित्वक्षतिः न चानुमाननिष्ठप्रत्यक्षोपजीवकतायाः प्रमिति[illegible]
विभाजकोपाध्यवच्छिन्नकरणत्वावच्छिन्नत्वाच्च हेत्वादिनिष्ठानुमानोपजीवकतायाः तथात्वात् कथं तुल्य
त्वमिति वाच्यं मनसोप्यनुमितिकरणत्वेनानुमाननिष्ठप्रत्यक्षोपजीवकतायाः प्रमितिविभाजकोपाध्य

वच्छिन्नत्वाभावान्नवत्तथापि अनुमानेनिष्टप्रत्यक्षोपजीवकत्वमदृष्टाद्वारकं प्रत्यक्षेनिष्टमनुमानोपजीवकत्वं वा
दृष्टद्वारकमितिकथं तुल्यत्वमितिवाच्यं यत्र चक्षुर्घर्षणेन सर्वचक्षुर्नाशानंतरं चक्षुरंतरोत्पादः तत्र घर्षणजन
कप्रदृष्टस्य जनकस्य कृतिसाध्यताद्यनुमानस्यादृष्टाद्वारकोपजीवकतायाः अपि प्रत्यक्षप्रमाणे सत्वात्।। मनः
संयोगस्यापि प्रत्यक्षप्रमितिकरणतया प्रत्यक्षप्रमाणेऽन्तर्गतत्वेन तस्यैवादृष्टद्वारा मनोरूपानुमानजन्यत्वा
च्चेतिभावः नचैवं संगतेस्तस्य त्वेनिरूपणे पौर्वापर्ये किंनियामकमितिवाच्यं। स्वतंत्रस्येतिन्यायेन ग्रंथकर्तुरि
च्छाया एव नियामकत्वादिति हृदयं ननु वक्ष्यवादीत्याद्यभिधानमयुक्तं अनुमाननिरूपणे तदनुपयोगात्तत्र न चानंत
राभिधेयोपमानेऽनुमानसंगतिप्रदर्शनाय तदुपयोगः उपमाननिरूपण एव सा तत्र तस्य दर्शयितुमुचितत्वा
दित्यत आह लाघवायेति तत्राप्यवादिसंमतत्वादनुमानोत्तरमित्यभिधानेऽनेकवर्णवृद्ध्यापत्तेस्सदुकस्य न नै ८
मात्र यालाघवमितिभावः यद्वा तत्प्रदर्शने प्रत्यक्षानुमानयोरनुमानोपमानयोश्चैकवाक्यताऽनुमितिः सम्
हालंबनरूपैवोत्पद्यते ।तत्र तत्प्रदर्शने त्वेकवाक्यतायाः अनुमित्यनंतरमपि कल्प्यमितिभावः अत्रेदं

चिंत्यं तत्रैवाथोपमानं निरूप्यत इत्यत्राथशब्दात्परमेव स्मरतद् इत्यन्निधाने विपरीतमेव वक्रकल्पनागौरवमेवं च तत्रैक
।४ वाक्यतानुमितिसंतरकल्पनमपि नदृष्टो बाधयवक्रवादीति वक्रवर्णकल्पनापेक्षया तस्यैव लघुत्वात् । न चात्र त
त्प्रदर्शने समूहालंबनशाब्दबोधेनैवोपपद्यते तत्र तत्प्रदर्शनेन वशाब्दबुद्ध्यनंतरं कल्प्यमिति गौरवमिति
वाच्यं तत्रत्ये समूहालंबनशाब्दधीस्वीकारे गौरवाभावात् वक्रतरवर्णकल्पनापेक्षया शाब्दबोधस्यैव ककल्प नेप॰
पदिति नयालघुत्वाच्चेति नन्वनुमानस्य वक्रवादिसंमतत्वात्कीर्त्तनात् कथमुपमाने संगतिजानन्नित्यत आह प्रसि शम
द्धतयेति इष्टसाधनीभूतप्रसिद्धिविषयतयेत्यर्थः सुप्रतिपदतयेति बलवद्द्वेषविषयाजनकप्रतिपत्तिकृत
येत्यर्थः अत्रैव हेतुः निरसनीयास्य वादिविप्रतिपत्तिकत्वेनेति प्रथमं जिज्ञासेति अनुमानप्रतिपत्ताविष्ट ॥१२॥
साधनत्वबलवद्द्विष्टाजनकत्वयोः सत्त्वेन प्रतीतिसंभवात्तत्र च्छोत्पत्तौ बाधकाभावादिति भावः नोपमान
इति अनुमानस्य वक्रवादिसम्मतत्वोपदर्शनेनोपमानेऽस्य वादिसंमतत्वमभिमतं तत्र यस्य संमतिरेव
नास्ति तस्योपमानप्रसिद्धेरभावेन उपमान प्रतिपत्तेरप्रतीततया धर्मिज्ञानाभावादेव न जिज्ञासा यस्य

वासम्प्रतिरस्ति तस्यापि निरसनीयवक्रत्वादिविप्रतिकत्वेन वक्रतरदुःखानुबंधिप्रतिपत्तिफलग्रहोन्नेसत्यर्थः दुरूहत्वा
त्र वक्रतरदुःखानुबंधिप्रतिपत्तिकत्वात्तदुत्सर्गिकीरीतिमिति तादृशदुःखवत्ववद्द्वेषनिबंधनां विस्मामयीमि
त्यर्थः कस्यचिदिति तादृशदुःखवत्ववद्द्वेषरहितस्येत्यर्थः तथाचावसरसंगत्येत्यनुमाने प्रथमं जिज्ञासोत्त
पत्तौ तन्निरूपणेच तत्तन्निवृत्तेरिति भावः नन्ववसरस्याग्रिमग्रंथाभिधानप्रतिबंधकीभूतजिज्ञासानिवृत्तिरूपस्य
प्रतिबंधकाभावत्वेनस्वरूपसत्तएवाग्रिमग्रंथनिरूपणे प्रयोजकतयानिरूक्ततादृशजिज्ञासाजनकज्ञानविषयत्वाभा
वात्कथं संगतित्वमित्यत आह यथा चेति आकारप्रमाणवार्त्तिकेऽयमभिप्रायः अग्रिमाभिधानप्रतिबंधकीभूत
जिज्ञासानिवृत्तिर्नावसरः । किंतु तत्प्रतिबंधकीभूतजिज्ञासानिवृत्त्युत्तरवक्तव्यत्वमेवावसरः तच्च ज्ञातमेव
उपयुज्यते अतः परंयद्वक्तव्यंतस्य ज्ञानेभवत्विति जिज्ञासया निरूपणादिति सार्वभौममत आह शाब्दांतरेति उप
मितिविषयीभूतभिन्नगवादिपदेत्यर्थः समयः शक्तिः तद्ग्राहकं गोपदं गविशक्तं असति वृत्त्यंतरे वृद्धैस्तत्र प्रयुज्य
मानत्वादित्याकारकमनुमानमित्यर्थः उपमितिविषयीभूतस्यत्वर्हस प्रवृत्तिनिमित्तेति गवयपदं सप्रवृत्तिनि

भिन्नकेंद्रवृत्तिमत्त्वात् यद्यद्वृत्तिमत्तत्तत्सप्रवृत्तिनिमित्तकमिति सामान्यतोदृष्टमनुमानमित्यर्थः सप्रवृत्तिनिमित्त
त्वंच किंचिद्धर्मावच्छिन्नशक्तिमत्त्वं एतद्द्वयं हि गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थज्ञानानन्तरं वा उपमानं
६३ नस्यादिति भावः सर्वत्रत्वादि। अत्र ततोऽदृष्टजनकेति। अदृष्टस्य कार्यमात्रं प्रति हेतुत्वात् यथा उपमानं प्रत्यप्यदृष्ट
हेतुः तच्चादृष्टं विहितगोचरप्रवृत्तितः सा च मलनेम्पतादित्तानात्। तच्चानुमानेनेति परंपरयाऽनुमानमपे
क्षते सर्वमेवोपमानमित्यर्थः निखिलमिति इदं च संभवत्प्राचुर्याद्युक्तं वस्तुतो निखिलोपमानेऽतद्सत्त्वेपि
नव्यतिरिक्तं प्रायमिति मंतव्यं इहापि। अनुमानोपमानयोरपि केचित् इति। अस्वरसवीजं तु उपजीवक राम
त्वस्यसंगतित्वे अत्राकरे बहुवादिसम्मतत्वं कथमत्रोपयुक्तं स्यादिति। यद्वितु बहुवादिसम्मतत्वादित्यस्य
उपमानकारणतयात्। अनुमानकार्यतया वा बहुवादिसम्मतत्वादित्यर्थः। तद्दानकोप्यस्वरस इत्य ॥२३॥
वधेयं। ननु प्रत्यक्षानुमानयोः संगत्यभिधानेपि इह सूत्रे वा साक्षात्कारनिरूपणानुमाननिरूपण
योः पौर्वापर्ये किं विनिगमकमित्यत आह संभवतीति इह निरूपणयोरपीति साक्षात्कारज्ञानानुमा

नयोरपीत्यर्थः तथाच साक्षात्कारज्ञानस्यानुमानज्ञानहेतुत्वे न तज्ज्ञानं विनाऽनुमानज्ञानं न संभवतीति त
न्निरूपणयोः पूर्वापरभावइतिभावः नन्वनुमितिकरणत्वप्रकारेणानुमानज्ञानं प्रति न साक्षात्कारज्ञान
हेतुरित्यत आह अथेति अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववत्शेषवत्सामान्यतोदृष्टं चेति सूत्रेस्यार्थः
प्रत्यक्षपूर्वत्वेनेति प्रत्यक्षपूर्वकत्वप्रकारेणानुमाननिरूपणादित्यर्थः एतत्सूत्रार्थो हि अथ प्रत्यक्षनिरू
पणानंतरमनुमानं निरूप्यतइति शेषः तत्पूर्वकं व्याप्यादिप्रत्यक्षपूर्वकमनुमित्यात्मकं ज्ञानं यत्तस्मादि
त्यध्याहार्य्यं तथा च यतो व्याप्यादिप्रत्यक्षपूर्वकमनुमित्यात्मकं ज्ञानं तद्धनुमानमित्यन्वयः तच्च त्रिविधं
पूर्ववत् पूर्वं कारणं तल्लिंगकं यथा तंतुषु पटानुमापकतंतुसंयोगनिष्ठव्याप्तिज्ञानं शेषः कार्य्यं तद्वत्तल्लिं
गकं यथा वन्ह्याद्यनुमापकधूमादिनिष्ठव्याप्तिज्ञानं सामान्यतोदृष्टं कार्य्यकारणभिन्नलिंगकं यथाद्रव्या
श्रितत्वाद्यनुमापकगुणत्वादिनिष्ठव्याप्तिज्ञानमिति ननु सूत्रे तत्पूर्वकमिति वर्त्तते प्रत्यक्षपूर्वकं कुतोल
भ्यत इत्यत आह तद्दृष्टेनेति आदिना पक्षधर्मतापरिग्रहः अत्रापि अनुमानपरिच्छेदेपि सहकारप्रत्यक्षहेतिरि

दंचव्यभिचारज्ञानविरहसहकृतंसहचारदर्शनंव्याप्तिग्राहकमित्यत्रदर्शनपदंप्रत्यक्षपरमित्यभिप्रायेणतन्निरूप
णात्‌अनुमाननिरूपणात्‌तस्यव्याप्त्यादि॰प्रत्यक्षपूर्वकत्वप्रकारेणसहचारनिरूपणेतिप्रत्यक्षज्ञानेत्यर्थः तथा
चानुमानज्ञानमात्रस्यसाक्षात्कारज्ञानजन्यत्वेपिप्रकृतेयादृशज्ञानंजननायंतज्ज्ञानंसाक्षात्कारज्ञानज
न्यमेवेतिभावः इदानीमनुमाननिरूपणोपमाननिरूपणयोः पौर्वापर्येपिविनिगमकंदर्शयतिएवमितिनि
रूपणंज्ञानं अनुमाननिरूपणापेक्षं अनुमानज्ञानापेक्षंनिरूपितंचोपमानखंडे अनुमानभिन्नत्वेनोप
मानमितिभावः अनुमितिकरणत्वप्रकारेणानुमाननिरूपणएवानुमानांशेऽनुमितिविशेषणत्वमित्य
तस्तादृशनिरूपणपरतयैवतद्ग्रंथावहेलक्षणेतिप्रकाशितादृतीयार्थः अनुमानइत्यत्रविशेष्यत्वंस
प्तम्यर्थः। निरूपणीयइतिभावसाधनंतथाचलक्षणादिप्रकारकानुमानविशेष्यककर्तव्यनिरूपणेइत्यर्थः
नन्वनुमानंनिरूप्यतइतिप्रतिज्ञातंनिरूप्यतेचानुमितिरित्यर्थांतरमित्यतआहकरणस्येतिक्रियात्वेदृत्तिन्न
मूर्तिकतयेतिक्रियनस्नेदज्ञानाधीनक्रियाविशेषकरणत्वहेतुकइत्तस्नेदग्रहकतयेत्यर्थः अनुमितिंप्रत्य

राम
॥१४॥

त्वादिप्रमितिभिन्नत्वज्ञानं विनाऽनुमितिकरणत्वेन हेतुनाऽनुमानस्यापि इतरभिन्नत्वज्ञानेन संभवति अनुमितिप्र
त्यक्षाद्योरनैक्यग्रहात् प्रत्यक्षादिप्रमितिकरणे व्यभिचारज्ञानापत्तेरिति भावः केचित्तु करणस्यानुमितिकरणस्य
वै । क्रियाऽनुमितिस्तस्या लक्षणं व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वरूपं तेन भिन्ना घटिता मूर्त्तिर्व्याप्ति
विशिष्टपक्षधर्मताज्ञानजन्यज्ञानकारणत्वं यस्य एवंभूतत्वमित्यर्थः फललक्षणपूर्वकमिति अनुमितिलक्ष
णपूर्वकमित्यर्थः तल्लक्षणमिति अनुमितिकरणलक्षणमित्यर्थः विशेषणज्ञानं विना विशिष्टबुद्ध्यसंभ २
वादिति भावइत्याहुः अत्र लक्षणवाक्यार्थ इत्यग्रे तेनेनान्वयः [illegible] मतमाह व्याप्तिविशिष्टत्वे इति व्या
प्तिविशिष्टत्वे पक्षधर्मत्वसामानाधिकरण्यं पक्षधर्मत्वे व्याप्तिविशिष्टत्वसामानाधिकरण्यं वाऽवगाहते
यत्ज्ञानं तज्जन्यत्वमित्यर्थः [illegible]
[illegible] ननु व्याप्तिविशिष्टत्वपक्षधर्मत्वयोर्यत्सामानाधिकरण्यं
तदवगाहिज्ञानजन्यत्वमित्यर्थः ऊहो वह्निमानित्यादिभ्रमानुमितौ व्याप्तिविशिष्टत्वपक्षधर्मत्वयोः सामानाधि

१५

15

करणाप्रसिद्ध्या तत्समस्याप्यसंभवेन ज्ञानपदोपसंधाने नैयिमयं[त्य]थासंगतेरिति बोध्यं ननु लक्षणवाक्ये सामाना
धिकरण्य[illegible] वाचकपदाभावात् सामानाधिकरण्यं कुतो लभ्यते इत्यत आह कर्मधारयोत्तरेति कृत्तद्धितसमासे
भ्यः संबंधावगमस्त्वतल्भ्यामिति पाणिनिवचनादिति भावः ननु भावप्रत्ययस्य सामानाधिकरण्यत्वेन वा
शक्तिः तत्तत्पदार्थतावच्छेदकद्वयसामानाधिकरण्यत्वेन वा आद्ये नीलत्वोत्पलत्वयोः सामानाधिकरण्या
लाभः इतरविशेषणत्वेनोपस्थितस्य पदार्थतावच्छेदकद्वयस्य सामानाधिकरण्यविशेषणत्वेनान्वयायो राम
गात् न च पदद्वयस्य नीलत्वोत्पलत्वयोरेव लक्षणा अतो नान्वयानुपपत्तिरिति वाच्यं गौरवान्नीलोत्
१ पलपदाद्भेदान्वयानुभवापलापाच्च अंत्ये समस्यमानपदद्वयोपस्थापितपदार्थयोरन्वयानुपपत्तेः तत्तत् ॥१५॥
पदार्थतावच्छेदकद्वयस्य पदार्थैकदेशत्वात् न च समस्यमानपदद्वयं तात्पर्यग्राहकमिति वाच्यं प्र
त्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभंगप्रसंगात् प्रकृत्यर्थयोरभेदान्वयानुभवापलापप्र
संगाच्च न च तत्तत्पदार्थतावच्छेदकद्वयसामानाधिकरण्यत्वेनैव शक्तिः समस्यमानपदार्थद्वयस्य तत्रैव तयोः

वि

सामानाधिकरण्यमितिप्रतीतिसाक्षिकावच्छेदकतारव्यस्वरूपसंबंधविशेषेणतादृशसामानाधिकरण्ये यइति व१
वाच्यएवं हि नीलोत्पलत्वमुत्पलसमवेतमितिवाक्यमयोग्यं स्यात् स्याच्च नीलोत्पलत्वमुत्पलत्वेति योग्यं
गौरवं चेतिमेवं कर्मधारयोत्तरस्य भावप्रत्ययस्य सामानाधिकरण्यसंबंधेन एकपदार्थतावच्छेदकवद्परपदार्थ
तावच्छेदकमर्थः लाघवान् नीलोत्पलत्वमित्यादावपि सामानाधिकरण्यसंबंधेन नीलत्वद्रुत्पलत्वादिकमेवा व४
र्थ एवं च प्रकृतेपि सामानाधिकरण्यसंबंधेन व्याप्तिसंबंधवत्पक्षसंबंधज्ञानेपि पर्यवसितार्थः सामानाधि
करण्यावगाहीत्यस्य संसर्गमर्यादया सामानाधिकरण्यावगाहीत्यर्थः सामानाधिकरण्यवचनत्वादित्यस्य
च संसर्गमर्यादया सामानाधिकरण्यवचनत्वादित्यर्थः। घटत्वं पटत्वमित्याद्यसमस्तत्वे तु घटेतरासमवेतत्वे स त
ति घटनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वे सति समवेतत्वरूपघटत्वादिप्रकारेण घटादिकमेवार्थः स
अभावाद्यावत्तिप्रसंगवारणाय समवेतत्वोपादानं प्रकृतिप्रत्ययाभ्यां मिलित्वा घटवृत्ति घटत्वमित्येवान्वय
बोधः एवं सर्वत्र प्रकृत्यर्थवृत्तित्वस्य त्वपदार्थे ज्ञानं। सत्ते त्वप्रत्ययस्य सत्तात्वरूपेण सत्तैवार्थः सत्तात्वं तु सन्निष्ठ

४ दित्यर्थः

ता

म॰टी॰
१६
16

काशत्वं

न्योन्याभावप्रतियोगितानवच्छेदकत्वे सति समवेतत्वमात्रं न तु स्वेतरासमवेतत्वस्य तत्र प्रवेशो व्यर्थत्वाद् अप्रसिद्धे
त्वाच्च प्रमेयत्वमित्यत्र च प्रमेयत्वत्वरूपेण प्रमेयत्वमेवार्थः प्रमेयत्वत्वं च प्रमाविषयत्वत्वं विषयत्वत्वं च विषये
तावत्स्वरूपसंबंधविशेषोऽतिरिक्तपदार्थो वा न तु प्रमेयनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वे सति विशेष
णताविशेषेण वर्त्तमानत्वं आकाशाभावादौ वाच्यत्वादौ चातिव्याप्तेः एतेन वाच्यत्वादिकमपि व्याख्यातं आका
शत्वमित्यत्र चाकाशत्वत्वेनाकाशत्वमेवार्थः आ[illegible]त्वं च शब्दत्वेन स्वाकाशेतरासमवेतत्वे सति आकाशनिष्ठा
न्योन्याभावप्रतियोगितानवच्छेदकत्वे च सति समवेतत्वं आकाशैकत्वादावतिव्याप्तेः कालत्वं दिक्त्वमित्यत्र राम
च कालत्वत्वं दिक्त्वत्वं कालत्ववत् स्वरूपसंबंधविशेषः न तु कालेतरावृत्तित्वे सतीत्यादिकं कालैकत्वादिप्र ॥१६॥
कारप्रमाविशेष्यत्वादावतिव्याप्तेः आत्मत्वं मनस्त्वमित्यत्र स्वात्ममनोभिन्नासमवेतत्वे सति आत्ममनो
निष्ठान्योन्याभावीयपर्याप्तिविशेषावच्छिन्नप्रतियोगितावच्छेदकताशून्यत्वे च सति समवायेन पर्याप्तत
रूपात्मत्वत्वमनस्त्वत्वमेव शक्यतावच्छेदकं आत्ममनोवृत्तिवैकत्वयोरतिव्याप्तिवारणाय पर्याप्ति:

द्वित्वा

विशेषावच्छिन्नत्वावच्छेदकता विशेषणत्वं च रमपर्याप्तिलोपादानान्नानादेः पर्याप्त्यनभ्युपगमेपि तत्रातिव्या
प्तिः ज्ञातेस्तुपर्याप्तिरूपे यत एव तेनासंभवः महत्वं गुरुत्वं घटत्ववत्व मित्यादौ महत्ववत्वगुरुत्ववत्वघटत्वादिज्ञातिप्र
कारेण महत्व[illegible] गुरुत्व[illegible] घटादिकमेवार्थ इत्यादि स्वयमूह्यं एवं च तत्प्रत्ययो नानार्थः तत्तत्पदसमभिव्या न्त
हारस्यतियामकत्वाच्च घटत्वमित्यादौ न पटत्वादिबोध। इति सांप्रदायिकाः केचित्तु घटत्वत्वपटत्वत्वाद्यनं
तस्य शक्यतावच्छेदक[illegible]कल्पने घटत्वादिघटकीभूतत्ववैशिष्ट्यानां शक्तिविषयत्वकल्पने च गौरवान्नानार्थेन
सर्वत्र इतरत्ववर्त्तमानमन्योन्याभावप्रतियोगितावच्छेदकं च विप्र[illegible]कल्पितानि पंचैव शक्यानि एवकार
वत्त्वव्युत्पत्तिवैचित्र्याच्च एकपदार्थस्यापि परस्परमन्वयः इतरान्योन्याभावयोश्च वारद्वयमन्वयः प्रकृति
पदार्थश्च घटादेर्लीनः तस्यापि वारद्वयमन्वयः तथा च घटत्वं पटत्वमाकाशम[illegible]त्मत्वमित्यादौ सर्वत्र प्र
कृतिप्रत्ययाभ्यां मिलित्वा घटेतरद्वृत्तिभिन्नत्वे सति घटनिष्ठान्योन्याभावप्रतियोगितावच्छेदके तरदित्या
दिरेवान्वयबोधः ननु घटादिवृत्तित्वस्यापि भानं न वा समवेतत्वादीनां पृथगंतर्भावः नैवं घटत्वमित्यादा

त्वे ३

७

१७

वत्त्वादिव गकाशत्वमित्यादावाकाशैकत्वादेः बोधापत्तिः तस्यापि ताहशावच्छेदकेतरत्वादितिवाच्यं। ता हशेतरत्वरूपेणापि प्रक
त्यर्थतावच्छेदकत्वेभेवबोधयतितान्यदितिसमभिव्याहारस्युत्पत्तेर्धर्मांतरनिरासात्तनवैवंसत्यंतमपि त्यज्यतामितिवाच्यं
तत्प्रकारेणबोधस्यानुभवसिद्धत्वात् अतएव गुणकर्मान्यत्वविशिष्टसत्वमित्यादौ नद्व्यत्वादेर्नानंसत्ताप्रमेयत्वमि
त्यादौ सन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकेतरत्वप्रमेयनिष्ठान्योन्याभावप्रतियोगितावच्छेदकेतरदित्यादिरि
वान्वयबोधः सदितरावृत्तित्वादेरप्रसिद्धत्वादेवाभानात् प्रकृत्यर्थतावच्छेदकमात्रबोधत्वेतुत्यस्यैवाकाशामभ्या क रामः
दैर्वाच्यत्वादेः अतोऽप्रत्यय: एवंनीलघटत्वमित्यादिकर्मधारयोत्तरभावप्रत्ययस्थलेपिनीलघटेतरवृत्तित्वभिन्न
त्वसतिनीलघटनिष्ठान्योन्याभावप्रतियोगितावच्छेदकेतरत्वरूपेणैवनीलघटत्वस्यान्वयबोधः नत्वसामानाधि ॥१२॥
करण्यक्वचनत्वादितिग्रंथविरोधः नीलघटत्वस्यैवविवक्षितविवेकेनीलत्वसमानाधिकरणघटत्वरूपत्वात्तज
न्यतत्संबंधावच्छिन्नवर्तमानत्वावच्छेदकत्वयोर्घटत्वादिघटकतयाकमेकरूपेणसर्वत्रशक्तिरितिवाच्यंसा
मान्यतोवर्त्तमानतावच्छेदकत्वद्वयोरेवशक्यतावच्छेदकत्वात् येनसंबंधेनप्रकृत्यर्थेप्रकृत्यर्थतावच्छेदकस्यभानंत

थ२

व२

न त्संबंधावच्छिन्नवृत्तित्वमात्रत्वावच्छेदकावच्छिन्नप्रतियोगिताकत्वयोः स्वरूपतः संसर्गतयाभानानादृष्टत्वादेर्बाधाभावात् तत्तत्प
दसमभिव्याहारस्यनियामकत्वाच्च नातिप्रसंगः न च गुणकर्मान्यत्वविशिष्टसत्त्वमित्यादौ यदा कर्मधारयोत्तरं त्व
प्रत्ययस्तदा विशिष्टस्यानतिरिक्ततया गुणकर्मान्यसदितरासमवेतत्वस्य विशिष्टसत्त्वे बाधादनन्वयप्रसंग इति वा न
च्यं सत्ताया विशिष्टसत्तानतिरेकतया व्यावर्तनीयाभावादेव तत्रापि सदितरासमवेतत्वस्याप्रवेशात् न चैवं गुण
गुणे समवायेन कर्मान्यत्वविशिष्टसत्ता नास्तीति व्यवहारविलोपापत्तिः तादृशप्रतियोगितानवच्छेदिकायाः सत्तायास्तत्र स
मवायेन सत्त्वात् इति वाच्यं विशिष्टवाचकपदोत्तरत्वप्रत्ययसमभिव्याहृतनञ्स्थले विशिष्टधर्मावच्छिन्नप्रति
योगिताव्यक्तेरेव स्वरूपतः संसर्गतया भानस्य तत्र इति व्युत्पत्त्यैव तथाव्यवहारोपपत्तेः अन्वयितावच्छेदकावच्छि
न्नप्रतियोगिताकत्वभानव्युत्पत्तेरत्र संकोचात् यद्वा तादृशस्थले प्रकृत्यर्थवृत्तित्वमपि त्वप्रत्ययार्थे भासते
तथा च तत्र नञा प्रकृत्यर्थविशिष्टत्वप्रत्ययार्थतावच्छेदकावच्छिन्नाभावबोधनात्तथाव्यवहारोपपत्तिः न च
तथापि घटत्ववत्त्वमित्यादावेकस्मिन्नपि घटे घटत्वत्वविरहो मान्याभावप्रतियोगितानवच्छेदकत्वाभावेनानन्व

१८

त्वा सत्

यप्रसंग एवं महत्त्वं गुरुत्वमित्यादौ महत्परिमाणादेः प्रतिव्यक्तिविभिन्नतया तत्रापि महत्परिमाणादौ महद्वादि नि य २
ष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वस्यासत्वादनन्वयप्रसंग इति वाच्यं उक्तरूपेणावच्छेदकत्वाश्रययोर
पि त्वप्रत्ययस्य शक्यतया तत्र घटवदितरावृत्तित्वे सति घटवन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकतानवच्छेद
काश्रयस्यैवान्वयबोधात् घटवद्वत्त्वमित्यादौ चावच्छेदकताश्रययोर्धर्मिद्वयमन्वयः तथा च घटवद्दितरा
वृत्तित्वे सति घटवद्वृत्तिनिष्ठान्योन्याभावप्रतियोगितावच्छेदकतावच्छेदकतानवच्छेदकाश्रयाश्रय इत्याद्यन्वय राम
बोधः एवमवच्छेदकताश्रययोरैक्येनान्वयबुद्ध्या घटवद्वृत्तित्वमित्यादावप्यन्वयः संगमनीय इत्याहुः केचित्तु भाव ॥१८॥
प्रत्ययस्य धर्मत्वरूपेण धर्मे शक्तिः धर्मत्वमाधेयत्वं तत्वं तत्पदसमभिव्याहारविशेषवशाद्घटत्वादिरूपधर्मवि
शेषलाभः कर्मधारयस्थलेपि धर्मत्वरूपेणैकपदार्थतावच्छेदकसमानाधिकरणपरपदार्थतावच्छेदकस
पधर्मस्यैव भानं न चैवं पटे घटत्वं नास्तीति व्यवहारविरोधापत्तिः घटवृत्तिधर्मस्य द्रव्यत्वादेस्तत्र सत्वादिति
वाच्यं त्वसमभिव्याहृतनञाप्रकृत्यर्थवृत्तित्वविशिष्टधर्मत्वावच्छिन्नाभावबोधनात् तथा व्यवहारोपपत्ते

मादायत्र्प तदादि२

रित्याहुः। तदसत्त्वमनुभवविरोधात्। तस्मात् इतरत्ववृत्तिमत्वादिकमपेक्ष्य लाघवात् घटत्वपटत्वादिज्ञाति द्य१
रेव त्वप्रत्ययशक्यतावच्छेदिका घटत्वं पटत्वमित्यादौ तत्वमित्यादि घटविशिष्टवाचकतत्तच्छब्दोत्तरत्वप्रत्ययस्य
त्वे च मुख्यप्रयोगः घटत्वं पटत्वमित्यादौ नीलोत्पलत्वमित्यादिकर्मधारयस्थले च यथानुभवं लक्षणा नव
घटत्वपटत्वाद्यनंतानां शक्यतावच्छेदकत्वे गौरवत्वे गौरवाल्लाघवेन इतरत्वादिस्यैव शक्यतावच्छेदकमिति
वाच्यं। घटत्वादिकं प्रत्येकं विशेषविनिगमकविरहतायां घटत्वादिरूपलाघवावतारादिति प्राहुः। ननु कृदो वन्हि
धदिप्र मानित्याद्यनुमितौ व व्याप्तिस्तत्र व्याप्तिविशिष्टत्वे पक्षधर्मत्वसामानाधिकरण्यस्य पक्षधर्मत्वे व्याप्तिविशि
ष्टत्वसामानाधिकरण्यस्य वा बाधितत्वेन तदवगाहि ज्ञानजन्यत्वाभावादित्यत आह ज्ञानपदोपसंदानेनेति
सामान्यतः ज्ञानपदोपसंदानेनेत्यर्थः बाधितेति बाधिताबाधितसाधारणसामानाधिकरण्यविषयकेत्यर्थः नियम
त इति कदाचित् समूहालंबनविधया सामानाधिकरण्यविषयकत्वसंभवान्नियमत इत्युक्तं। तथा च समू
हालंबनजन्यानुमितौ लक्षणसंभवेपि वन्हिव्याप्यधूमवान् पर्वत इत्यादिपरामर्शजन्येऽव्याप्तिरिति भावः।।

म-टी
१९
14

नि३

ननु व्याप्तिसंबंधवत्पक्षसंबंधज्ञानत्वेन न हेतुत्वं दर्शितादृशज्ञानादनुमितिरसिद्धैवेत्यत आह गौरवेति किंतु व्याप्ति
विशिष्टप्रकारकपक्षनिश्चयत्वेनेति भावः । ननु मास्तु तस्य हेतुतामानं तथापि परामर्शस्य व्याप्तिविशिष्ट ज्ञा२
ष ज्ञानत्वलिंगविशिष्टज्ञानत्वमेवाप्यनुपपत्तिरेव मानं भविष्यति विशिष्टज्ञानत्वं हि नैव विशिष्टावगाहिज्ञानत्वं स
मूहालंबनेऽतिप्रसंक्तेः किंतु विशेषणविशेष्ययोर्विशेषणविशेष्यसंबंधस्य प्रतियोगित्वानुयोगित्वरूपसंबं
ध विषयकत्वं एवं च व्याप्तिसंबंधपक्षसंबंधयोरेकधर्मिनि संबंधमानेमेव सामानाधिकरण्यग्रह इत्यत आह रामः
संबंधसंबंधेति संबंधसंबंधाविषयकत्वेपीत्यर्थः उपपादितत्वादिति तत्प्रकारकज्ञानत्वमेव न हि विशिष्टज्ञा
नत्वं प्रकारकत्वं च प्रतीतिसाक्षिकः समूहालंबनव्यावृत्तः स्वरूपसंबंधविशेषः ज्ञानविषययोर्विषयतावदि ॥९॥
ति प्रत्यक्षखंडे मणिकृता उपपादितत्वादित्यर्थः इतरथा नवद्रुमसंबंधसंबंधविषयकत्वमपि संबंधसंबंध
मात्रावगाहिसमूहालंबनेऽतिप्रसंक्तमिति भावः । ननु व्याप्तिविशिष्टत्वेपक्षधर्मत्वसामानाधिकरण्येपक्षध
र्मत्वे व्याप्तिविशिष्टत्वसामानाधिकरण्यं वाऽवगाहते यज्ज्ञानं तज्जन्यत्वं न विवक्षितं लक्षणवाक्यात्तदप्र

नगा ८

तीतेः किंतु वस्तुगत्या व्याप्तिविशिष्टत्वसमानाधिकरण्यं यत्पक्षधर्मत्वं तज्ज्ञानजन्यत्वमेव विवक्षितं कर्मधारयोत्तरभा
वप्रत्ययस्यैकपदार्थतावच्छेदकसमानाधिकरण्यं यत्पक्षधर्मत्वं ण्यापरपदार्थतावच्छेदकबोधकतया लक्षणवाक्य
त्वस्यैव प्रतीतेः नैवं लक्षणवाक्यजन्यशाब्दबोधे सामानाधिकरण्यमात्रान्तद्विषयीभूततज्ज्ञानेपि सामानाधिकरण्याव
गाहित्वं सम्यगिति वाच्यं नहि शाब्दबोधे यद्भासते तदेव तद्विषयीभूततज्ज्ञानेपि विषय इति नियमः घटतिर्विक
ल्पकमित्यादिशाब्दज्ञाने व्यभिचारात् तथा च सामानाधिकरण्यानवगाहिपरामर्शजन्येनाव्याप्तिः तस्या
त्रपि वस्तुतो व्याप्तिसंबंधसामानाधिकरण्यो यः पक्षसंबंधस्तज्ज्ञानजन्यत्वात् नैवं प्रमेयत्वादिना तादृशप
क्षधर्मत्वावगाहिज्ञानजन्येऽतिप्रसंगवारणाय ज्ञाने तदुभयसामानाधिकरण्यावगाहित्वमवश्यं विवक्षणी
यं तथा चाव्याप्तिरिति वाच्यं विवक्षणीयत्वाविशेषणान्तद्वारणाय ज्ञाने व्याप्तिप्रकारत्वस्यैव विवक्षणीयत्वा
दित्यरुचेराह भ्रमस्थले चेति ह्रदो वह्निमान् धूमादित्यादिभ्रमेणानुमितिस्थले चेत्यर्थः तादृशसामानाधिकरण्येति व्या
प्तिसंबंधपक्षसंबंधयोः सामानाधिकरण्याप्रसिद्धेरित्यर्थः तज्ज्ञानस्येति व्याप्तिसंबंधसमानाधिकरणो यः पक्षसं

वंधस्तज्ज्ञानस्येत्यर्थः ननु अत्र मतद्वलेऽसौ दे व्याप्तिसंबंधवत्पक्षसंबंधपरामर्शोऽपि विषयीक्रियते इत्यत आह असदिति
सत्वस्य ख्यातिविषयनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वनिरासादित्यर्थः तेन न सिद्धं सिद्धिव्याघातः नहि सन्निकर्षमा
त्रिकृतिर्वा वित्ते येन तज्ज्ञानं स्यात् तत्सत्वे चासत्वव्याघातः असत्ख्यातिरूपसन्निकर्षाव्यासिद्धत्ते वा ज्ञान[illegible]मस्ति
अनादिरेवं संसर्गमर्यादया वा तज्ज्ञानं स्यादिति चेन्न एवं यद्यसत्ख्यातौ मा[illegible]स्यात् शशविशानं इत्यादि बुद्धेः ख
ण्डशः प्रसिद्ध्या सद्विषयकत्वेनैवोपपत्तेरिति भावः अनुमानुमितिस्थलेलक्षणव्याप्तिमुक्त्वा तत्र लक्षणघटकजनशाब्दबोधा
नुपपत्तिमप्याह अवांतरेति साध्यपक्षभेदेन व्याप्तिपक्षधर्मताभेदाद्वह्निव्याप्तिसमानाधिकरणकूदधर्मता विशिष्टत्व रामं
ज्ञानं ज्ञानं वह्निसाध्यकाकूदपक्षकानुमितिरित्यादि प्रातिस्विकरूपेणैवान्वयबोधे एतद्लक्षणवाक्यात् स्यात्
ज्ञान विशिष्टत्व स च न संभवति वह्निव्याप्तिसमानाधिकरणकूदधर्मतेत्याकृति योग्यताज्ञानसत्वात् इत्यर्थः अवांतरवाक्या ॥२०॥
र्थस्यापि महावाक्यार्थांतरंगत्वादिति भावः तदेवोपपादयति विशानइति विशानत्वावच्छेदेनेत्यर्थः तेन विशा
नत्वसामानाधिकरण्येनापि न शशीयत्वबुद्धिसंभवः इति शाब्दबुद्धेरिति इत्यस्मात् शाब्दबुद्धेरित्यर्थः यद्यपि शश

विषाणं नेत्यभिदं कार्मुकमित्यत्र लक्षणया शशपदार्थस्य शशसंबंधिनः लक्षणया विषाणपदार्थस्य विषाणसंबंधि
न एकदेशे विषाणे तादात्म्येनान्वयः विषाणसंबंधिनस्तादात्म्येन तज्जन्योऽन्वयः इत्येवं रीत्याऽन्वयबोधः तत्र
च विषाणे शशसंबंधाभावनिश्चयेन विरोधीग्राह्याभावानवगाहित्वात् किंतु तादात्म्येन शशसंबंधस्याभाववनि
स्य एव तथेति कथमेतत् तथापि शशविषाणे इत्यत्र लुप्तषष्ठीस्मरणेनान्वयबोधाभिप्रायेणेदं केचित्तु
नाभावात् नचैकस्य विषयस्य सत्त्वेऽपरस्यातीतानागतस्यापि प्रसक्षापत्तिरिति वाच्यं अतीतानागतविष- ॥३६॥
ये सन्निकर्षाभावात् यत्र लौकिकविषयतया साक्षात्कारोत्पत्तिस्तदवच्छेदेन अव्यवहितपूर्वकाले विष-
स२ यतायाः अपेक्षितत्वे अतीतानागतविषयावच्छेदेनाव्यवहितपूर्वकाले विषयसत्त्वाभावाच्च प्रत्यक्षानुत्प-
त्तेः नचैवमेतद्घटप्रत्यक्षस्य लौकिकविषयतया वर्तमानघटावच्छेदेन उत्पत्तिवारणाय यथोक्तविशेष

तद्रूपेस्य गुरुत्वादेः प्रत्यक्षवारणाय तादात्म्येन गुरुत्वादेः लौकिकप्रत्यक्षप्रतिबंधकत्वमेव लघीय इति वाच्यं ॥ फलमुख
गौरवत्वेन ३

त्व२

कार्य्यकारणभावस्यावश्यकत्वमिति वाच्यं घटाद्यंतरेसन्निकर्षसत्त्वे इष्टापत्तेः अन्यथा तदभावादेव तत्र तदनुत्पादादि
ति चेन्न यत्सामान्ययोः कार्य्यकारणभावः बाधकं विना तद्विशेषयोरपीति व्याप्तिबलेन विशेषकार्य्यकारणभावाभ्यु
पगमात् नन्वेवं विषयस्य तत्तद्व्यक्तित्वेन विशेषतः कार्य्यकारणभावस्यावश्यकत्वेन विषयस्य विशेषतः कार्य्यका
रणभावकल्पनाया अदोषत्वात् नन्व विशेषकार्य्यकारणभावस्यावश्यकत्वे विषयस्य सामान्यतो हेतु
त्वमानाभावः यावद्विशेषसामग्र्या बाधादेव गुरुत्वादेरप्रत्यक्षतासंभवात् इति वाच्यं यद्विशेषयोरिति न्या
येन सामान्यकार्य्यकारणभावस्यावश्यकत्वात् मिश्रानुयायिनस्तु विषयस्य सामान्यत एव कार्यकारण
भावो न तु विशेषतोपि अनंतकार्यकारणभावस्यावश्यकत्वात् प्रसंगात् यत्सामान्ययोरिति न्यायस्यौ
त्सर्गिकत्वादिति प्राञ्चः इति संक्षेपः विशिष्टस्मरण इति साध्याव्याप्यहेतुमान् पक्ष इति विशिष्टवैशिष्ट्या
वगाहिस्मरण इत्यर्थः तत्र तादृशविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वादित्यभिमानः एतच्चापाततः
सामान्यतो ज्ञानत्वस्मृतित्वेनैव हि ज्ञानस्मृत्योः कार्य्यकारणभावः न तु निश्चयत्वस्य तत्र प्रवेशः गौरवात्

४०

[illegible]

तथा च साध्यव्याप्यहेतुमान् पक्ष इति विशिष्टस्मरणे कथमतिव्याप्तिः नैवैवं संशयात् संशयाकारस्मरणापत्ति
रिति वाच्यं निश्चयत्वेन हेतुत्वेपि विभिन्नकालीनतत्तदभावनिश्चयजन्यप्रत्येकसंस्काराभ्यां मिलित्वा संशया
कारस्मरणजननस्य दुर्वारत्वात् न च निश्चयाकारसंस्कारस्य विरोधिविषयकस्मरणप्रतिबंधकत्वो
पगमान्न विभिन्नकालीनभावाभावविषयकसंस्काराभ्यां संशयाकार [illegible]
[illegible]

स्मृत्युदयात् इति वाच्यं तथा सत्यनुद्बुद्धनिश्चयाकारसंस्कारसत्वेपि विरोधिविषयकस्मृत्यनुत्पादापत्तेः अ
न्यथा ज्ञानत्वेन हेतुत्वेपि निश्चयाकारसंस्कारत्वमपेक्ष्य लाघवात् संस्कारत्वेनैव विरोधिविषयकस्मृतिप्रति
बंधकत्वोपगमादेव संशयात् संशयाकारस्मरणवारणसंभवात् अथ विरोधिविषयकज्ञानस्य संस्का
रनाशकतया विभिन्नकालीनतत्तद्भावनिश्चयजन्यसंस्कारयोर्मिलनासंभवात् ताभ्यां न संशयाकार
स्मरणसंभवः न च तथापि शंखः श्वेत इति ज्ञानोत्तरोत्पन्नदोषविशेषजन्यशंखो न श्वेत इति ज्ञानाद्वि

राम ॥६०८॥

नश्यदवस्थस्येव तज्ज्ञानसहकृतासंशयाकारसंस्कारसंत्वेन ततः संशयाकारस्मृत्युत्पत्तिर्दुर्वारा इति वाच्यं

तत्प्रकारकज्ञानत्वावच्छिन्नं प्रत्येव तदभावप्रकारकनिश्चयस्य प्रतिबंधकत्वोपगमेन यैत्यत तदभावप्र

कारकनिश्चयाभ्यां संशयाकारसंस्काराः संत्वात् इति चेन्न विरोधिविषयकज्ञानस्य संस्कारनाशकत्वे मा

नाभावात् आत्मतत्वसाक्षात्कारस्य मिथ्यावासनानाशकत्वप्रवादस्य निर्युक्तिकत्वेनानुपादेयत्वात् वि

रोधिविषयकज्ञानस्य संस्कारनाशकत्वेपि यत्र घटाभाववद्भूतलमिति लौकिकप्रत्यक्षेण संस्कारज

ननानंतरं दिवसादिविलंबेन घटवद्भूतलमित्यनुमित्यात्मकज्ञानेन संस्कारो जनितस्ताहृशप्रत्येकसं

स्काराभ्यां मिलितासंशयाकारस्मरणजनने बाधकाभावाच्च तत्व तत्राप्यनुमित्यादिनाहृवसंस्कारोनश्य

तइति वाच्यं अनुमित्यादेः प्रत्यक्षाविरोधित्वेन तज्जनितसंस्कारानाशकत्वात् विरोधिविषयकज्ञानस्य

स्वप्रतिबध्यज्ञानजन्यसंस्कारं प्रत्येव नाशकतायाः प्राचीनैरुपगमात् अथोद्बोधकस्य फलबलकल्प्य

तया एकदा तत्तदभावप्रकारकस्मृतिजनकयोरुद्बोधकयोरसमवधानात् विभिन्नकालीननिश्च

म॰ टी॰
४१
५१

यजन्यसंस्काराभ्यां संशयाकारस्मरणजननमिति चेन्नहि ज्ञानत्वेन स्मृतिहेतुत्वेपि फलबलादेव दोषत्रयोद्बोधकसमवधाना
भावादेव संशयाच्छंशयाकारस्मृतिवारणसंभवात् किंतु निश्चयत्वेन हेतुतयात्र प्रस्तुवा संस्कारं प्रत्येव निश्चयत्वेन
जनकत्वं तथा च संस्काराभावादेव संशयान्न स्मरणं न च संस्कारं प्रति निश्चयत्वेन जनकत्वं स्मृतिं प्रति वेत्यत्र वि
निगमनाविरहः स्मृतिं प्रति निश्चयत्वेन संस्कारं प्रति ज्ञानत्वेन इत्यस्यापि सुवचत्वात् इति वाच्यं संस्कारं प्र
ति ज्ञानत्वेन हेतुत्वे संशयस्थलेऽनंतसंस्कारतत्प्रागभावध्वंसादिकल्पनागौरवापत्तेः फलमुखगौरवस्यापि दो राम
षत्वात् न च संशयस्थलेपि कोटितावच्छेदकविशिष्टकोटिद्वयविषयकसंस्कारस्य धर्मितावच्छेदकविशिष्टधर्मिवि ॥४१॥
षयकसंस्कारस्य चोभयत्वादिसिद्धतया तस्यैव धर्मिणि कोटिद्वयवैशिष्ट्यविषयताकल्पनान्नातिरिक्तसंस्का
रा॰ दिकल्पनं कोटितावच्छेदकादिवैशिष्ट्यांशे उपेक्षात्मके धर्मिणि कोटिद्वयवैशिष्ट्यांशे चानुपेक्षात्मके संशये माना
भावात् इति वाच्यं तथापि कोट्यादिविषयकसंस्कारस्य धर्मिणि कोटिद्वयवैशिष्ट्यविषयिताकल्पनायामेव गौर
वात् सर्वांशे उपेक्षात्मकसंशयस्थले संस्कारादिकल्पनागौरवस्य दुर्वारत्वात् न चैवं तावता तादृशसंशयभेदस्य सं

स्कारजनकतामात्रप्रवेशेपिसंशयांतरभेदस्यविनिगमकाभावादुक्तयत्रैवप्रवेशइतिवाच्यंसर्वांशउपेक्षात्मकसं
शयभेदस्यस्मृतिजनकतायामप्रवेशएवातिव्याप्तिविरहात्सम्भनुमितिजनकतायांनिश्चयत्वघटकतयासर्वांशे
उपेक्षात्मकसंशयभेदस्यापिप्रवेशेनतदवच्छिन्नजनकतायाएवलक्षणेनिवेशात्तन्नवनिश्चयत्वस्यसंस्का
रजनकतावच्छेदकत्वेस्मृतिजनक[illegible]तावच्छेदकमपितदेवनतुज्ञानत्वमात्रंव्यापारस्वरूपायोग्यत्वइति
धर्मेणकारणतावच्छेदकइतिनियमादितिवाच्यंतादृशनियमानभ्युपगमेसंस्कारानुत्पत्तेवेति[redacted]ऽसंगतेः अग्निमग्रंथा ५
नवनिश्चयत्वस्यनिश्चिनोमीत्यनुभवसाक्षिकविषयिताविशेषरूपतयागौरवान्नावेनउक्तयत्रैवतदेवजनक
तावच्छेदकंज्ञानत्वस्यव्यापकधर्मत्वेनान्यथासिद्धत्वादितिवाच्यंतथापिवक्ष्यमाणयुक्त्यास्मृतिजनकतायांसमा ना
नविशेष्यकत्वसमानप्रकारकत्वयोरप्रवेशात्सामान्यतोनिश्चयत्वस्मृतित्वेनैवहेतुहेतुमद्भावात्व्याप्यप्र
कारकपक्षविशेष्यकनिश्चयत्वेनहेतुतायाश्चलक्षणेनिवेशात्ववस्कतस्ययादृशविषयविशेषनियमतो
वन्हिव्याप्यधूमवत्पर्वतनिश्चयएवयत्रोद्देश्यः तादृशविषयविशेषस्यस्मृतावेवातिव्याप्तिस्तत्रलाघवात्सा

धकः

म॰दी

४२

42

मान्यतो वह्निव्याप्यधूममवगत्य पर्वते तन्निश्चयत्वेनैव उद्बोधकविधया हेतुत्वादिति सारं उपेक्षात्वस्य त्वेनेति उपेक्षात्वत्वविशेषि
तेन परामर्शत्वेनेत्यर्थः उपेक्षात्वस्य दुर्वचतया तदवच्छिन्नात्वेन हेतुत्वसंभवः इत्यभिप्रायेणाह उपेक्षात्वं हीति
चाक्षुषत्वादिनेति आदिना त्वाचत्वादिपरिग्रहः संकरप्रसंगादिति उपेक्षात्वं विहाय चाक्षुषत्वं अनुपेक्षात्वं वा चाक्षु- वाक्कुषे ३
षत्वं विहाय उपेक्षात्वं त्वाचादौ वर्तमानं चाक्षुषोपेक्षात्मज्ञाने संकीर्णमिति भावः एवं त्वाचत्वादिनापि ननु चा
क्षुषत्वादिव्याप्यं नानैव उपेक्षात्वं अस्तावन्न तस्य च कारणतावच्छेदकत्वमित्यत आह आंशिकेति एकमेव ज्ञा राम
नं अंशात उपेक्षा अंशतोऽनुपेक्षेत्युपगमादित्यर्थः न हि जातिरव्याप्यवृत्तिरिति भावः नन्वांशिकत्वेपि जाति ॥४२॥
त्वे को दोषः न चैवं परत्वादेरप्यांशिकत्वापत्तिरिति वाच्यं मानाभावेन तस्यांशिकत्वानभ्युपगमात् न च
सांकर्यादिवद् हांशिकत्वमपि जातित्वाभावनियतमिति वाच्यं व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः
रूपहानिरसंबंधो जातिबाधकसंग्रहः इति षण्णामेव जातिबाधकत्वेन उदयनकिरणावल्यामाचार्यैः परिग
णनात् व्यक्तेरभेदः एकव्यक्तिवृत्तित्वं मात्रं तुल्यत्वं तुल्यव्यक्तिवृत्तित्वं यथा घटत्वकलशत्वादिरूपहा

एतयोरेव परस्परं सांकर्यापत्तेः उपेक्षात्वस्यांशिकत्वे तु न तथा सांकर्ये प्रतियोगिजात्यंतराभावादिति चेदत्राहुः जन्यः ... मेव जातिः २८

ग्रं २ भावा १

निर्वित्सलाभावः असंबंधः असमवेतत्वं यथा कंबुग्रीवादिमत्त्व सास्नादिमत्त्वादिः नैवं भ्रमत्वप्रमात्वयोरपि चाक्षुषत्वा
दिव्याप्यतानाजातित्वापत्तिः आंशिकत्वस्यैव तत्र बाधकत्वाभावादिति वाच्यं भ्रमत्वप्रमात्वयोरांशिकजातिबाध
कत्वेन परिगणनस्योपलक्षणतया सांकर्यादिवदांशिकत्वमपि जातित्वबाधकं प्रामाणिकसिद्धत्वेनस्यावि
शिष्टत्वात् तद्दूनादृष्टे सांकर्यादेरप्यबाधकत्वापत्तेरित्याहुः नव्यास्तु उपेक्षात्वस्यांशिकजातित्वे स्वात्मकजाति
मादायैव सांकर्यं स्वसमानाधिकरणात्यंताभावप्रतियोगिजातिनिष्ठस्वस्वाभावो भूयसामानाधिकरण्यक
त्वस्य सांकर्यपदार्थस्य भेदाभेदसाधनैत्वात् तथा च सांकर्यांतर्गतमेवांशिकत्वं नवैवं वैशिष्ट्यव्यासज्यवृत्ति
धर्मावच्छिन्नाभावमादायातिव्याप्तिवारणाय प्रतियोगिव्यधिकरणत्वेनात्यंताभावस्यावश्यं विशेषणीयतया
कथमांशिकत्वं सांकर्यांतर्गतं स्वस्य स्वसमानाधिकरणतादृशाभावाप्रतियोगित्वादिति वाच्यं वैशिष्ट्यव्या
सज्यवृत्तिधर्मानवच्छिन्नत्वेन विशेषणादिति प्राहुः प्रकारांतरेणोपेक्षात्वं निरूप्य निराकरोति नापीति प्रवृत्ति
निवृत्त्येतितद्विशेष्यकतत्प्रकारकप्रवृत्तिनिवृत्त्यजनकत्वमित्यर्थः अजिज्ञासितेति तद्विशेष्यकतत्प्रका

म०टी
४२
५३

रकजिज्ञासाजन्यत्वमित्यर्थः तेनोपेक्षाविषयकस्यापिकार्यांतरीयपुरूषांतरीयजिज्ञासाविषयत्वेपिनक्षतिस्त
यावत्तद्विशेष्यकतत्प्रकारकप्रवृत्तिनिवृत्ति[illegible]जनकत्वेनतद्विशेष्यकतत्प्रकारकजिज्ञासाजन्यत्वेन
तद्विशेष्यकतत्प्रकारकस्मृतौहेतुत्वमितिभावः तादृशादितिप्रवृत्तिनिवृत्त्यजनकात् अजिज्ञासितविष
यकी[illegible]त्वेत्यर्थः संस्कारेतितद्विशेष्यकतत्प्रकारकसंस्काराजनकत्वमित्यर्थः उपेक्षात्वमितिशेषः तथा
चतद्विशेष्यकतत्प्रकारकसंस्कारजनकज्ञानत्वेनतद्विशेष्यकतत्प्रकारकस्मृतिहेतुत्वमितिभावः राम
न रूपापरिचयादितिनिश्चयत्वेनसंस्कारजनकत्वेउपेक्षायास्तदजनकत्वानुपपत्तेः संस्कारजनकत्वेनच
तत्वेआत्माश्रयइतिभावः तथाचावच्छेदकाग्रहेकारणत्वाग्रहइतिहृदयं रूपांतरापरिचयादितिपाठेसंस्कार ॥४३॥
जनकत्वंविहाय अन्यस्यसंस्कारजनकतावच्छेदकस्यापरिचयादप्रसिद्धेरित्यर्थः संस्कारजनकत्वस्य
तत्वेचात्माश्रयइतिभावः ननुस्मृतिजनक[illegible]ज्ञानत्वमेवसंस्कारजनकतावच्छेदकंवाच्यमतआह आ
त्माश्रयप्रसंगाच्चेति संस्कारजनकत्वज्ञाने स्मृतिजनकत्वज्ञानंस्मृतिजनकत्वज्ञानेचसंस्कारजनकत्व

ज्ञानमित्येवंरूपेत्यर्थः रूपांतरापरिचयादन्योन्याश्रयप्रसंगादितिवकारशून्यपाठस्मृतिजनकत्वं विहायान्यस्यरूप
स्यापरिचयादप्रसिद्धेरन्योन्याश्रयापत्तेरिति एवकार एव हेतुः नच जनकत्वस्यैसंसर्गमर्यादयाप्रवेशान्नान्यो
न्याश्रय इति वाच्यं तथापि घटादौ अमि जनकत्वदृत्वंप्रतीत्याद्यन्यथासिद्धेर्दुर्वारत्वात्। अत एव तद्वि
शेष्यकतत्प्रकारकसंस्कारोपाधायकज्ञानत्वेनहेतुत्वे तेनजनकतावच्छेदकापरिचयेपिनक्षतिरितिपरा
स्तं अन्यंप्रतीत्याद्यन्यथासिद्धेर्दुर्वारत्वादिति भावः ननु तत्तज्ज्ञानत्वे दृकूट एवोपेक्षात्वं विषयिताविशेषोवा
तदवच्छिन्नभेद एव स्मृतिजनकतावच्छेदक इत्यत आह संस्कारेति असमरणसंभवे उपेक्षास्थलेऽस्मरणसंभ
वे तदप्रवेशादिति उपेक्षात्वस्याप्रवेशादित्यर्थः तथाच संस्कारजनकतावच्छेदक एव उपेक्षान्यत्वं प्रवेश्य
तेन तु स्मृतिजनकतावच्छेदके नचोपेक्षान्यत्वस्य संस्कारजनकतावच्छेदके प्रवेशः स्मृतिजनकतावच्छेदके
प्रवेशोप्यावश्यकः व्यापारस्वरूपयोग्यवृत्तिधर्मस्य कारणतावच्छेदकत्वनियमादिति वाच्यं तादृशनि
यमे मानाभावादिति भावः नचोपेक्षान्यत्वं संस्कारजनकतावच्छेदके प्रवेश्यते स्मृतिजनकतावच्छेदके वेत्यत्र वि

निगमनाविरह इति वाच्यं संस्कारजनकतावच्छेदके उपेक्षान्यत्वस्याप्रवेशे स्मृतिं प्रत्येव तथात्वे उपेक्षाजन्यसंस्कारतत्ध्वंस
प्रागभावादिकल्पने गौरवापत्तेः फलमुखगौरवस्यापि दोषत्वात् न चैतावता सर्वांशे उपेक्षाभिन्नस्य संस्कारजनकतावच्छेद
के प्रवेशनियमेप्यंशिके उपेक्षाभिन्नस्य प्रवेशे वि निगमनाभावः तत्र यत्किंचिदंशे संस्कारस्यावश्यकतया तस्यैव
सर्वांशविषयित्वकल्पनेन न संस्कारादिव्यक्तिकल्पनागौरवाभावादिति वाच्यं तथापि तत्र क्लृप्तसंस्कारस्य सर्वांशविष
यित्वकल्पनायामेव गौरवात् उपेक्षात्वस्याखंडविषयिताविशेषरूपत्वपक्षे लाघवात् द्वांशिकानांशिकसाधारणैतद्
वच्छिन्नसामान्यभेदस्यैकस्य संस्कारजनकतावच्छेदके प्रवेशाच्चेति निगर्वः ।अनुभवत्वेन संशयान्यवन्हिव्याप्य
भ्रमवत्पर्वतानुभवत्वेन तथात्वमिति स्मृतिजनकत्वमित्यर्थः तथा च तादृशनिश्चयत्वेन जनकत्वाभावान्नातिव्या
प्तिरिति भावः सकृदिति स्मरणानंतरं वा तादृशानुभवेनैवेति नैव संस्कारद्वारा स्मृतिजननेन संभवात् स्मरणस्य
चैतवनये स्मरणाजनकत्वादिति भावः न च संस्कारमात्रं न फलनाश्यं कालादिनापि तन्नाशोपगमात् तथा च स
कृदनुभूतस्थले संस्कारादिकालादिनाश्य एवास्तु न तु स्मृतिनाश्य इति वाच्यं लाघवेन स्मृतिनाश्यतावच्छेदकैवे

संस्कारः १

×सकृदित्यस्य ॥स्मरणान्तरमिति॥ अनुभवजन्यसंस्कारस्य प्रथमस्मरणेनैव नाशात् ×
व्यापारत्वाभावेन स्मरणान्तरजननासंभवात् ×२

राम
॥४५॥

एतस्य च संस्कारस्य ३

ज्ञात्संस्येवात्र कल्पनात् कालादिनाश्यत्वे कालादेरनुगतकारणतावच्छेदकाभावेन विशेषत एव तत्तत्संस्कारनाशकत्वे
न एतद्व्यक्तिघटितातिरिक्तकार्यकारणभावांतरकल्पनायां गौरवात् न च तदानीं कालादिनाश्यत्वेऽपि सिद्धस्य सं
स्कारस्य [illegible] एक एव नाश इति तत्त्वेनैव जनकत्वमिति नातिरिक्तकार्यकारणभावकल्पनेति वाच्यं तथापि विनिगमका
भावादननुयोगिताविशेषेण जन्यसंस्कारेणापि कार्यंतयाकुर्वाणत्वादनंतकार्यकारणभावतादवस्थ्यात् ननु घ
टपटाविति समूहालंबनसंस्कारेण घटांशमात्रोद्बुद्धेन घटस्मरणजननानंतरं तिलं चेन पटांशे तदुद्बोधकवशात् प
टस्मरणं जन्यते कथमन्यथा प्रत्येकसंस्कारस्य तादृशैकसंस्कारवत्तो विसंवेन प्रत्येकस्मरणद्वयं तच्च संस्का
रस्य फलनाश्यत्वेन संभवति प्राथमिकघटस्मरणेनैव समूहालंबनसंस्कारनाशादित्यत आह समानाकारस्येति
तद्विशेष्यकतत्प्रकारकविजातीयसंस्कारत्वेन तद्विशेष्यकतत्प्रकारकस्मृतित्वेन नाश्यनाशकभावादित्यर्थः।
नचैवं एकेन स्मरणेन स्वसमानाकारसमानाधिकरणसर्ववर्त्तिसकलसंस्कारनाशापत्तिरिति वाच्यं इष्टत्वात् तादृश
स्मरणांतरस्य एतत्स्मृतिजन्यसंस्कारत एव संभवात् समूहालंबनादित इति घटपटोभयविषयकसमूहालंबन

संस्कारस्य घटविशेष्यकघटत्वप्रकारकत्वपटविशेष्यकपटत्वप्रकारकत्वयोरुभयोरेवाश्रयतया केवलप्राथमिकघटविशे
ष्यकघटत्वप्रकारकस्मरणेन नाशासंभवादिति भावः आदिना घटवत्भूतलमित्यादिविशिष्टसंस्कारपरिग्रहः तेना
पि उद्बोधवशात् घटस्मरणजननानंतरे विलंबेन भूतलस्मरणजननात् क्रमिकत्वे मेकनाशकालोत्पत्तिकत्वेन तु
समानविषयकसमानप्रकारत्वेन स्मृतेः संस्कारनाशकत्वे उक्तसमूहालंबनसंस्कारस्याविनाशित्वप्रसंगः प्रा
थमिकघट विशेष्यकघटत्वप्रकारकस्मरणाभावेन केवलचरमस्मरणेनापि नाशासंभवादतो विशेष्यचरमस्मृ शि॰ प
शि॰ ६ तिव्यक्तिरेव तत्र नाशिका वाच्या तथा च विशेष्यनाश्यनाशकभावात् तत्सत्त्वदनुमतस्थलेपि चरमस्मरणमेव नाश राम
कमस्त्विति चेन्न एतदनुरोधेन कालादेः संस्कारनाशकत्वोपगमात् अन्यथाऽनुत्पादितस्मरणसंस्कारे माना ॥४५॥
भावेन कालादेः संस्कारनाशकत्वकल्पनास्थलस्यैव दुर्लभत्वापत्तेः नच कालादिना तन्नाशकत्वोपगमे समानवि
शेष्यकसमानप्रकारकत्वेन स्मृतेः संस्कारनाशकत्वे व्यभिचार इति वाच्यं स्मृतिनाशतावच्छेदकवैजात्यविशेषस्य का ५२
र्यतावच्छेदककोटिप्रविष्टत्वेन व्यभिचाराभावात् लाघवात् समानविशेष्यकत्वसमानप्रकारकत्वेन नाश्यनाशक

भावेऽव्यवस्थितेऽव्यवधानेन क्रमिकस्मरणद्वयानंतरमव्यवधानेन क्रमिकस्मरणद्वयानंतरोत्पत्त्यासमूहालंबनस्मरणे
स्यापि वा तत्संस्कारनाशासंभवाच्च अस्तु वा तत्संस्कारो विनाश्य एव तत्संस्कारेऽप्युद्बोधकविरहादेवास्मरणोपपत्तेः ज
न्यभावत्वेन विनाशित्वनियमस्य वाप्रयोजकत्वात् अत एव कालादेः संस्कारनाशकत्वेऽपि मानाभावः किंचैवेन
क्रमिकस्मरणद्वयोपधायकसंस्कारनाशानुरोधेनैव तत्तत्कल्पनात् न च समानविशेष्यकत्वादिना सामान्यतो नाश्य
नाश्यनाशकभावे स्मृतिजन्यप्राथमिकसंस्कारव्यक्तीनां स्मृतिसमानकालोत्पन्नसमानाकारसंस्कारव्यक्तीनां
चक्षणिकत्वापत्तिरिति वाच्यं दृष्टत्वात् तृतीयक्षणोत्पन्नसंस्कारांतरादेव उत्तरस्मृतिसंभवात् वस्तुतस्तु फलोप
धायकत्वसंबंधेन समानाकारस्मृतेः संस्कारनाशकत्वं नाश्यतावच्छेदकसंबंधं प्रतियोगित्वमेवेति न कस्यापि क्ष
णिकत्वं यत्तु स्वाव्यवहितपूर्वत्वसंबंधेन समानाकारस्मृतेः संस्कारनाशकत्वमिति तन्न तथा सति पूर्ववर्त्तिनि
नूनप्रकारकसंस्कारेष्वपि प्रतियोगितासंबंधेन समानप्रकारकसंस्कारनाशापत्तेर्दुर्वारत्वात् अन्ये तु अनायत्यास्मृ
तिजन्यप्राथमिकसंस्कारव्यक्तिषु स्मृतिसमानकालोत्पन्नसंस्कारव्यक्तिषु च तज्जन्यस्मृतीनामपि विशेषतो ना

स्मृ॰
४६

शकत्वं तथा च सामान्यसामग्रीसत्वेपि विशेषसामग्रीविरहादेव न तत्र संस्कारनाशः सत्त्वदनुभूतस्थले चानुप
पत्तिविरहात्तत्र न विशेषसामग्र्यंतरकल्पनं गौरवादिति न काप्यनुपपत्तिरित्याहुः केचित्तु सर्वत्र धारावाहिक
संस्कारद्वयकल्पनायां धारावाहिकज्ञानस्थलेऽनंतसंस्कारकल्पनायां च गौरवापत्त्या तद्वारणाय समा
नाकारसंस्कारं प्रति समानाकारसंस्कारस्य प्रतिबंधकत्वात् स्मृत्तु सत्ति ज्ञाणे न द्वितीयज्ञाणे वा न संस्कारो
त्पत्तिः कुतस्तस्य ज्ञाणिकत्वं न च तथापि घटादेर्विजातीयो द्वौ धक्व शाँ यत्र धारावाहिकस्मरणद्वयं तत्र द्वितीये त५
स्मरणजन्यसंस्कारव्यक्तेः ज्ञाणिकत्वप्रसंगाद्दुर्वार इति वाच्यं संस्कारस्य कार्य्यसहभावेन स्म[illegible]तया धारावा राम
हिकस्मरणानभ्युपगमात् न च तथाप्युपेक्षानुध्यात्मकस्मरणजन्यसंस्कारव्यक्तेः ज्ञाणिकत्वप्रसंगो दुर्वा ॥४६॥
र इति वाच्यं उपेक्षानुध्यात्मकस्मरणानभ्युपगमात् तदभ्युपगमेपि स्मरणस्य कार्य्यसहभावेन संस्कारना
शकत्वाभ्युपगमेनैव तज्जन्यसंस्कारस्य ज्ञाणिकत्वारपरासंभवाच्चेत्याहुस्तदसत् । संस्कारस्य स्मरणजनक
तायाः स्मरणस्य संस्कारनाशकतायाश्च कार्य्यसंभावेन कल्पनामपेक्ष्य फलोपधायकतासंबंधेन स्मरणस्य

रणजनक६

संस्कारनाशकता [illegible] कल्पनाया एव लघुत्वात् न च घटादिकजातीयोद्बो धे ९१
धकसत्वे धारावाहिकद्वित्रिस्मृतिकल्पनामपेक्ष्य संस्कारस्य कार्यसहभावेन स्मरणजनकताकल्पने व
लघीयसीति वाच्यं तस्य फलमुखत्वादिति दिक्॥ ननु तथापि समानविशेष्यकत्वादिना स्मृतिसंस्कारयोर
र्न नाश्यनाशकभावः किंतु तत्तदात्मीयसंस्कारनाशत्वावच्छिन्नं प्रति तत्तदात्मीयचरमस्मृतेरेव तत्तद्व्य
क्तिकेत्वेन हेतुत्वं कल्प्यते अवच्छेदकलाघवात् स्मृतिजन्यानंतसंस्काराकल्पनेन व्यक्तिलाघवाच्चेत्या
त्मभेदेन कार्यकारणभावानामात्मगोचरसंस्कारनाशानुरोधेन तत्वाप्यनुमतत्वात् एकात्मसमवेतानां
च सर्वेषां संस्काराणां तावत्कालपर्यन्तं सजातीयोद्बोधकविरहादेवास्मरणोपपत्तेः वस्तुतस्तु संस्कारसामा
न्यनाशकतावच्छेदकत्वेन चरमस्मृतिमात्रवृत्तिरेका जातिरेव स्मृतित्वव्याप्या कल्प्यते चरमस्मृतिश्च समा
नाधिकरणसमानासमानाकारस्मृतिमात्रात्पूर्ववर्तिनी स्मृतिः तथा च प्रतियोगितासंबंधेन संस्का
रनाशत्वेन कार्यता स्वसमवायिसमवेतसंस्कारत्वसंबंधेन विजातीयस्मृतित्वेन कारणता स्वं विजातीय

म०टी

४१

स्मृतिः इत्थं चानुभवत्वेन कारणत्वेपि सहकृदनुभूतस्थलेस्मरणोत्तरं न स्मरणानुपपत्तिः अनुभवजन्यसंस्कार
व्यक्तेरेवचरमस्मरणपर्यंतंसत्वादितिभेवं एवंरूपेणनाश्यनाशकभावेयस्यविषयविशेषस्यघटज्ञानाद्या
त्मकानुगतैकजातीयोद्बोधकजन्यानिदृशपंचवास्मरणान्येवजातानिनत्वधिकानितस्यविषयविशे
षस्यकालांतरेपिघटज्ञानाद्यात्मकोद्बोधसमवधानेस्मरणांतरापत्तेःचरमस्मृतेरेवसंस्कारनाशकत्व
यासंस्कारसत्वादुद्बोधकसत्वाच्चैनवतत्रकालांतरीयघटज्ञानादिव्यक्तिनोद्बोधिकेतिवाच्यंलाघवात्त
त्रघटज्ञानत्वेनैवोद्बोधकत्वकल्पनात्तज्ज्ञानव्यक्तित्वेनोद्बोधकत्वेनानंतकार्यकारणभावप्रसंगात्त
एतेनसंस्कारस्यापूर्वस्येवसविषयकत्वेमानाभावःउक्तरूपेणैवस्मरणस्यसंस्कारनाशकतयासमान
विशेष्यकत्वसमानप्रकारकत्वाभ्यांसंस्कारस्मरणयोर्नाश्यनाशकभावविरहात्तन्नाश्यनाशकभावस्य
तत्रमानत्वेनवक्तुमशक्यत्वात्संस्कारस्यातींद्रियतयाज्ञानविषयकत्ववदनुव्यवसायस्यापितत्रमा
नत्वासंभवाच्चैनवसमानविशेष्यकत्वसमानप्रकारत्वाभ्यांसंस्कारस्मरणयोःकार्यकारणभावएवसंस्का

राम

॥९७॥

रस्य सविषयत्वमाननमिति वाच्यं स्मर्य्यमाणतः संस्कारत्वेन स्मृतित्वेनैव कार्य्यकारणभावात्तेन रूपेण कार्य्यकारणभा
वस्यैवासिद्धेः न चैवं यत्र किंचित्संस्कारसत्त्वे ज्ञातपदार्थानामपि स्मरणापत्तिरिति वाच्यं स्वजन्यसंस्कार
संबंधेन समानविशेष्यकत्व समानप्रकारकत्वाभ्यां ज्ञानस्मरणयोः कार्य्यकारणभावादेवाज्ञातपदार्था
नामस्मरणसंभवात् अथ तथापि घटांशे उपेक्षात्मकात् घटपटसमूहालंबनात् पटस्मरणवत् घट
स्मरणापत्तिः संस्कारस्य स्वजन्यसंस्कारसंबंधेन घटज्ञानस्य च सत्वात् एवं द्रव्यत्व घटत्वोभय प्रकारक
घटज्ञानात् घटत्वांशे तूपेक्षात्मकात् द्रव्यत्वप्रकारक घटस्मरणवत् घटत्वप्रकारकघटस्मरणापत्तिः
न च तत्रोद्बोधकाभावान्न स्मरणमिति वाच्यं उद्बोधकविरहेनैवं विधातिप्रसंगवारणे ज्ञानसंस्कारयो
रेव स्मृतिहेतुत्वा सिध्यापत्तेः घटादिज्ञानात्मकानुगतैकजातीयोद्बोधकस्य च उद्बोधकस्यापि संभवाच्चेति चेन्न तत्तदंशी
योपेक्षाभिन्नसमानविशेष्यकसमानप्रकारकज्ञानत्वेनैव स्वजन्यसंस्कारसंबंधेन हेतुत्वात् न च तथापि ज्ञानसंस्का
रयोः समानविशेष्यकत्वसमानप्रकारकत्वाभ्यां कार्य्यकारणभावानुरोधेनैव संस्कारस्य सविषयत्वसिद्धिरिति वा

मरी०
४८
४८

येज्ञानसंस्कारयोरपिसामान्यतोज्ञानत्वसंस्कारत्वाभ्यांहेतुत्वात्संस्कार स्यविषयत्वासिद्धेरेकविषयज्ञाना
द्परविषयकसंस्कारस्यापादयितुमशक्यत्वात्। न च सामान्यतोज्ञानत्वेन हेतुत्वे संशयादपि संस्कारकल्पनापत्तिः
निश्चयत्वेन हेतुत्वे निश्चयस्य तत्तद्विषयघटिततया व्यभिचारवारणाय तत्तद्विषयवत्संस्कारस्य का
र्यतावच्छेदकत्वमावश्यकमिति संस्कारस्य सविषयकत्वसिद्धिरिति वाच्यं सर्वांशे संशयस्यासिद्धत्वात् सं
शयात्तत्र किंचित् संस्कारोत्पादस्य सर्वसिद्धत्वात् न च तथापि ज्ञानत्वेन हेतुत्वे उपेक्षाज्ञानादपि संस्कार राम
कल्पनापत्तिः तन्नंदंशीयोपेक्षाभिन्नज्ञानत्वेन हेतुत्वोपगमे तत्तद्विषयक संस्कारस्य कार्यताव
च्छेदकत्वावश्यकतया संस्कारस्य सविषयकत्वसिद्धिरिति वाच्यं त्र्यांशिकोपेक्षातोऽपि किंचित् संस्का ॥४८॥
रोत्पादस्य सर्वसिद्धत्वात् सर्वांशोपेक्षायाश्च तत्र ज्ञानमुक्तिभिन्नज्ञानत्वेन हेतुत्वाभ्युपगमादेव वा
रणासंभवात्। नचैतदुत्तरयत्रोपेक्षाभेदप्रवेशगौरवमिति वाच्यं। तर्वांशिकोपेक्षाभेदस्य संस्कार
जनकतायां प्रवेशः मम तु स्मरणजनकतायां सर्वांशोपेक्षाभेदस्य चोन्यमत एव संस्कारजनकता

यांप्रवेशादिति तु स्पष्टत्वात् अत एव भेदकूटानां विशेषणविशेष्यभावे विनिगमकाभावेनानंतस्मरणजनकताकल्प
नापत्तिरपि निरस्ता । तद्वांशिकोपेक्षा भेदानां विशेषणविशेष्यभावभेदेन संस्कारजनकतानंत्यमस्तु तदिदं न
स्मरणजनकतानंत्यं सर्वांशोपेक्षाभेदानां विशेषणविशेष्यभावभेदेन संस्कारजनकतानंत्यं चोत्तयमत एवावि
शिष्टमिति तु स्पष्टत्वात् इति कस्यचित् तन्न तापितमप्युपास्तं उक्तयुक्त्या संस्कारस्मरणयोः समानविशेष्यकत्वादिना
नाश्यनाशकभावावच्छेदकतया नाश्यनाशकभावस्यैव संस्कारस्य सविषयत्वेमानत्वात् तत्र हृदंशयोपेक्षानि
न्त्वे । न स्मृतिहेतुत्वे भेदकूटानामवच्छेदकतया तेषां विशेषणविशेष्यभावे विनिगमकाभावेनैकस्मिंस्त्वविष
ये ज्ञानस्मरणयोरनंतकार्यकारणभावापत्तेश्च तच्च तवापि संस्कारं प्रति तादृशज्ञानत्वेन हेतुत्वात् ज्ञा
नसंस्कारयोरनंतकार्यकारणभावापत्तिर्दुर्वारेति वाच्यं मम प्रकारोपधायकतासंबंधावच्छिन्नतद्विशेष्यकत
त्प्रकारकस्मृतित्वभाववज्ज्ञानात्पत्तानत्वेन तद्विशेष्यकतत्प्रकारकसंस्कारं प्रति हेतुतया भेदकूटस्य
ज्जनकतावच्छेदककोटावप्रवेशात् । न च मम मापि प्रकारोपधायकतासंबंधावच्छिन्नतद्विशेष्यकतत्प्रकारकस्मृ

म०टी०
५९

५१

स्याभाववज्ज्ञानान्यज्ञानत्वेन स्मृतिहेतुत्वमिति वाच्यं तत्र कार्य्योपधायकत्वस्य तत्र कार्य्यकारणतानवच्छेदकत्वात् संस्कारस्य
सविषयत्वानुपगमे न फलोपधायकतासंबंधावच्छिन्नतद्विशेष्यकतत्प्रकारकसंस्काराभाववज्ज्ञानान्यज्ञानत्वेन
हेतुत्वस्य वक्तुमशक्यत्वात् इत्यलं पल्लवेन ननु ज्ञानत्वस्य व्यापकधर्मतयाऽन्यथासिद्धतयाऽनुभवत्वेन व्याप्यध
र्मेणाकारणत्वकल्पनेऽनायत्या सकृदनुभूतस्थलेऽतिमस्मृतिव्यक्तेरपि विशेषतोऽनुभवजन्यसंस्कारव्यक्तौ ना राम
शकत्वं कल्प्यते तथा च सामान्यसामग्रीसत्वेपि विशेषसामग्रीविरहादेवानुभवजन्यसंस्कारव्यक्तेः प्राथ
मिकस्मृतिव्यक्तितो न नाश इत्यस्वरसादाह- जायते चेति दृढतरः झटितिस्मृत्युपधायकः केचित्तु दार्ढ्यं संस्का ॥६६॥
रगतो जातिविशेष इत्याहुः ॥ तन्न तत्र मानाभावात् न च झटितिस्मरणादिकमेव मानमिति वाच्यं झटित्युद्बोधक
समवधानादेव झटितिस्मरणसंभवात् ननु पुनःपुनःस्मरणेन दृढतरः संस्कारो जन्यत इत्येवासिद्धं किंतु पु
नःपुनःस्मरणे न झटित्युद्बोधकं संपद्यत इत्यत आह परित्यज्य चेति निश्चितेति निश्चितो व्यभिचारो येन ता
दृशं व्यापकधर्ममित्यर्थः तच्च प्रकृते निश्चयत्वमिति भावः गृह्यमाणेति गृह्यमाणो व्यभिचारो येन तादृशेन व्या

प्यधर्मेणेत्यर्थः तेन्वप्रकृते ऽनुभवत्वे स्मरणस्य स्मरणोत्पादकत्वसंदेहेन व्यभिचारसंदेहात्तथा भिचारग्रह्यमाणव्य
भिचारकेण व्याप्यधर्मेण निश्चितव्यभिचारकस्य व्यापकधर्मस्यान्यथासिद्धिरिति भावः दूहमुपजत्तणं परि
त्यज्य निश्चितव्यभिचारकं लघुरूपं गृह्यमाणव्यभिचारकेण कार्यत्वस्यापि न कल्पकं अत एव विशिष्टज्ञानत्वं विहा
य विशिष्टानुभवत्वं विशेषणज्ञानजन्यतावच्छेदकमित्युपाध्यायाः इदमेव वृचेत्ति । विशिष्टबुद्धौ विशेषणविषयकत्वे
नैव हेतुत्वं न तु ताहशज्ञानत्वेन प्रवृत्त्यादाविष्टतावच्छेदकप्रवृत्तिविषयवैशिष्ट्यावगाहिज्ञानत्वेनैव हेतुत्वं न तु पुरो
वर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानत्वेन इत्यत्रापि इदमेव बीजमित्यर्थः ननु स्मृते संस्कारजनकत्वेऽयसि
द्धांतरूस्य तत्राह अभिहितं चेति तात्पर्यटीकायां । न्यायवार्त्तिकटीकायां । प्रथमसूत्रे । प्रमाणप्रमेयइत्यादिसूत्रे ।
मिस्त्रे । वीचिस्मृति मिश्रैः । स्मृतीनामिति टीकायां नव सर्वसूर्ववर्ण स्मृति सहितांऽ स्ववर्णानुभवजं श्रोत्रजन्यपदानु
भवइति वाच्यमिति पङ्क्तिकां तरमिय पङ्क्तिकीस्व र्द्ध कार्यं ति स्वकार्यः संस्कारो विरोधीनाशकायामेवं भूततानां सा
मित्यर्थः अत्रस्वपदेन स्मृतेरभिधानात् स्मृतेः संस्कारजनकत्वं प्रबद्धमिति भावः साक्षादिति । साक्षात्त्व्व मत्वं

नं

म०टी०
५०
50

वतज्जन्याजन्यत्वे सति तज्जन्यत्वेन चैवं परामर्शजन्यसिद्ध्यादिनाशजन्यानुमितौ विशेषणज्ञानतया परामर्शज
न्यत्वेन धर्मेण तत्र वह्नित्वादिप्रकारकत्वेन विशेषणज्ञानतया जनितायामनुमितौ चाव्याप्तिरिति वाच्यं ज्ञातिगर्भलक्ष
णादेव तत्संग्रहात् अस्तु वा तज्जन्यसंस्कारान्यत्वे सति तज्जन्यत्वं सा ज्ञानजन्यत्वमिति भावः अत्र गौरवमेवास्वर
सः विशिष्टवैशिष्ट्यबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वमते तादृशप्रत्यक्षादावतिव्या
प्तिः ज्ञानपदस्य यथाश्रुतार्थत्यागश्चेत्यतः प्रकारान्तरमाह किं वेति। व्याप्यविशेष्यकादिति। वह्निव्याप्यो
धूमः पर्वतहृदस्मादित्यर्थः तदुक्तनयेति व्याप्यपक्षोभयवैशिष्ट्यावगाहीत्यर्थः तत्रानुमितौ अन्यथा पर ॥५०॥ राम
स्परव्यभिचारापत्तेरिति भावः तन्त्वेवं पर्वतवह्निव्याप्यवैशिष्ट्यं वह्निव्याप्यपर्वतवैशिष्ट्यं पर्वतेवह्निव्याप्य
पर्वतवैशिष्ट्यं पर्वतवह्निव्याप्यवैशिष्ट्यं पर्वतवैशिष्ट्यं पर्वते वैशिष्ट्यवान् वह्निव्याप्यः वह्निव्याप्यवैशि
ष्ट्यवान् पर्वत इत्यादिज्ञानात् प्रमेयमित्यादिज्ञानाच्चानुमित्यापत्तिः न च संसर्गमर्यादया तदुक्तनयवैशि
ष्ट्यावगाहित्वं विवक्षितमिति वाच्यं प्रमेयवान् इति ज्ञानात् वह्निव्याप्यवान् पर्वतवांश्च इति समूहाल

वनात् पर्वतवह्निव्याप्योन्वयवानिति ज्ञानाच्चानुमित्यापत्तेः न च व्याप्यत्वविशिष्टपक्षतावच्छेदकावच्छिन्नोन्वययोः प
रस्परं संसर्गमर्यादया वैशिष्ट्यावगाहित्वं विवक्षितमिति वाच्यं परस्परस्य दुर्वचत्वादिति मैवं साध्यव्याप्यत्ववि
शिष्टपक्षतावच्छेदकावच्छिन्नोन्वयमात्रनिरूपितसंसर्गमर्यादावैशिष्ट्यविषयितावत्त्वस्य विवक्षितत्वात् स
त्तयापि वह्निव्याप्यवान् धूमः पर्वत इत्यादिज्ञानादनुमित्यापत्तिरिति वाच्यं यथा घटपटः पटवान् घटः
पटे घटः घटवान् पट इत्यादिज्ञाने एव घटत्वविशिष्टपटत्वविशिष्टान्वयनिरूपितसंसर्गमर्यादावैशिष्ट्यविषयि
तावत्त्वं न तु घटवद्भूतलं पटवदित्यादि द्वित्वरूपेण घटविशेष्यकज्ञाने तद्वदत्रापि व्याप्यत्वविशिष्टपक्षतावच्छेदका
वच्छिन्नान्वयनिरूपितसंसर्गमर्यादावैशिष्ट्यविषयितावत्त्वविरहात् पक्षतावच्छेदकावच्छिन्ननिरूपित
वैशिष्ट्यविषयितायाः धूमत्वावच्छिन्ननिरूपितत्वेपि व्याप्यत्वविशिष्टानिरूपितत्वात् व्याप्यत्वविशिष्टनि
रूपितवैशिष्ट्यविषयितायाश्च पर्वतत्वावच्छिन्नानिरूपितत्वात् अथैवमपि वह्निव्याप्यपर्वतः पर्वतवान्
वह्निव्याप्य इत्यादिज्ञानादनुमित्यापत्तिः न च तदुभयवैशिष्ट्यावगाहित्वपदेन व्याप्यत्वरूपेण धूमे पर्वत

मु॰टी॰
५१
51

निरूपिताधेयतायाः पर्वतत्वरूपेण पक्षे व्याप्यनिरूपितायाः आधारतायाश्चावगाहित्वमनुमितित्वाच्यं आद्ये वह्निव्या
प्यवान् पर्वत इत्यस्यासंग्रहात् अत्राधेयताया भाने मानाभावात् द्वितीये पर्वते वह्निव्याप्य इति ज्ञानासंग्र
हात् तत्राधारताया भाने मानाभावादिति चेन्न व्याप्यत्वावच्छिन्ननिरूपिताधेयतानिरूपितत्वेन पर्वतत्वावच्छिन्ना
धारत्वानिरूपितत्वेन च तादृशविषयिताविशेषणात् पक्षविशेष्यकव्याप्यप्रकारकनिश्चयत्वेन हेतुत्वादि
नापि वह्निव्याप्यपर्वत इति ज्ञानवारणाय तद्व्याप्यत्वप्रकारताविशेषस्यैव प्रवेशनीयत्वादिति निश्चयत्वं च
पक्षतावच्छेदकावच्छिन्नपक्षे व्याप्याभावाप्रकारकत्वे सति व्याप्ये पक्षाभावाप्रकारकत्वं यद्वि वह्निव्या
प्याधूमः पर्वते न वा पर्वतः वह्निव्याप्यधूमवान् नेत्यादिसमूहालंबनं जायते जायते च तस्मादनुमितिस्तदा
पक्षे व्याप्याभावाप्रकारकत्वे सति यद्व्याप्यप्रकारकं तदन्यत्वे सति व्याप्ये पक्षाभावप्रकारकं यत्तदन्यत्वं निश्च
यत्वमिति न कोपि दोष इति संक्षेपः तदेवोक्तरूपेण कारणत्वमेव। नन्वेवमपि स्मृतावतिव्याप्तिस्तत्रा
पि तद्विशेष्यकतत्प्रकारकस्मृतिं प्रति तदुभयवैशिष्ट्यावगाहिज्ञानत्वेन हेतुत्वादित्यत आह एकतरेति व्याप्यवि
शेष्यकज्ञानात्पक्षविशेष्यकस्मरणाभावात्पक्षविशेष्यकज्ञानाद्व्याप्यविशेष्यकस्मरणाभावादित्यर्थः पंचम्यर्थस्तत्र वि

राम
॥५१॥

शिष्ट्येवकार्य्यकारणभावइत्यग्रेतनेनान्वयी।अन्यथेति तत्रापिउभयवैशिष्ट्यावगाहिसंशयभिन्नज्ञानत्वेनहेतुत्वइत्य
र्थः।उभयेति पक्षविशेष्यकस्मृतेरपिव्याप्यविशेष्यकत्वप्रसंगः।व्याप्यविशेष्यकस्मृतेरपिपक्षविशेष्यकत्वप्रसंगइ
त्यर्थः।एकविशेष्यकस्मृतिसामग्र्याएवअपरविशेष्यकस्मृतिसामग्रीत्वात्तत्रानुमितेश्चपक्षविशेष्यकत्वनियमेप
क्षविशेष्यकानुमितित्वमात्रस्यैवकार्य्यतावच्छेदकत्वात्।नोभयविशेष्यकत्वप्रसंगइतिभावः।अनियमेनेतिक्वचित्पा
ठः तत्रकरणानियमेनेत्यर्थः।नियामकाभावेनेत्यर्थइतिकश्चित्।समानविशेष्यकत्वप्रवेशेहेतुमभिधायसमा
नप्रकारकत्वप्रवेशेहेतुमाह समानेति कार्य्यकारणभावात्उपधेयोपधायकभावात् तत्रनयोःस्मृतिज्ञानयोरिति
यावत् विशिष्टैवेति समानविशेष्यकसमानप्रकारकत्वेनैवेत्यर्थः।एतच्चप्राचीनमताभ्युपगमेनोक्तंच [illegible]
[illegible] क्तंतस्यज्ञानस्मरणयोःसमा
नविशेष्यकसमानप्रकारकत्वा[illegible]भ्यांकार्य्यकारणभावेमानाभावः किंतुसामान्यतोज्ञानत्वस्मृतित्वाभ्यामेवन
चैवमेकविशेष्यकएकप्रकारकज्ञानादपरविशेष्यकापरप्रकारकस्मरणापत्तिरितिवाच्यं।संस्कारस्यैवतयोःसमानवि
प

शेष्यकसमानप्रकारकत्वेन कार्यकारणभावादेव तदप्रसंगात् नच संस्कारस्य समानविशेष्यकसमानप्रकारकत्वेन हेतुत्वं ज्ञानस्यैव त्व
त्र विनिगमकाभावः। ज्ञानस्य समानविशेष्यकसमानप्रकारकत्वेन संस्कारस्य संस्कारत्वेनैव तस्यापि सुवचत्वादिति वाच्यं।
ज्ञानस्य समानविशेष्यकत्वसमानप्रकारकत्वेन हेतुत्वोक्तावपि संस्कारस्य समानविशेष्यकसमानप्रकारकत्वेन हेतु
ताया आवश्यकत्वात् अन्यथा यस्य पुंसः घटविशेष्यकघटत्वप्रकारकज्ञानमस्ति तादृशसंस्कारश्च नास्ति अन्यस्य
घटविशेष्यकघटत्वप्रकारकसंस्कारो घटविशेष्यकद्रव्यत्वप्रकारकसंस्कारो वा वर्त्तते। तस्यापि घटविशेष्यकघट राम
त्वप्रकारकस्मरणापत्तेः समानविशेष्यकसमानप्रकारकज्ञानसत्वात् संस्कारसत्वाच्च नच समानविशेष्यकसमान
प्रकारकज्ञानस्य संस्कारसंबंधेनैव हेतुतया तस्य पुंसः संस्कारसंबंधेन घटविशेष्यकघटत्वप्रकारकज्ञानाभा ॥५२॥
वादेव न तादृशस्मरणमिति वाच्यं यत्र घटविशेष्यकद्रव्यत्वप्रकारकं घटविशेष्यकघटत्वप्रकारकं च ज्ञानं समूहा
लंबनं वृत्तं अथ च तेन ज्ञानेन घटविशेष्यकघटत्वप्रकारकसंस्कारो न जनितः घटविशेष्यकद्रव्यत्वप्रकारक
संस्कारश्च जनितः तत्रापि घटविशेष्यकघटत्वप्रकारकस्मरणापत्तेः तत्र संस्कारसंबंधेनैव घटविशेष्यकघ

त्वप्रकारकज्ञानसत्वात् नत्वसमानविशेष्यकसमानप्रकारकसंस्कारसंबंधेनहेतुत्वं वक्तव्यं। तथा च घटविशेष्यक
घटत्वप्रकारकज्ञानस्य तादृशसंस्कारसंबंधेनाभावादेव न तादृशस्मरणमिति वाच्यं तादृशसंस्कारसंबंधत्वेन
धाघेवन ज्ञानत्वेन हेतुताया एवोचितत्वात् समानविशेष्यकत्वसमानप्रकारत्वप्रवेशप्रयोजनाविरहात्। गौ
रवाच्च नत्वसमानविशेष्यकसमानप्रकारकज्ञानस्यान्वयव्यतिरेकानुविधानात् संस्कारवत् ज्ञानस्यापि समान
विशेष्यकसमानप्रकारकत्वेन हेतुत्वमावश्यकमिति वाच्यं। तेनरूपेणान्वयव्यतिरेकानुविधानेपि गौर
वेनैतेनरूपेणान्यथासिद्धत्वात्। अपि च हि तत्सर्वज्ञावनियमस्य च समान विशेष्यकसमानप्रकारकसंस्का
रान्यथानुपपत्त्यैव संभवात् एकविशेष्यक एकप्रकारकज्ञानाद् परविशेष्यकापरप्रकारकसंस्कारानुत्
पत्त्या संस्कारं प्रति ज्ञानस्य समानविशेष्यकसमानप्रकारकत्वेन हेतुत्वात् यत्तु ज्ञानवत् संस्कारस्यापि न
समानविशेष्यकत्वादिना हेतुत्वं किंतु संस्कारत्वेनैव उद्बोधकस्य विशेषतः कार्यकारणभावेनैवातिप्रसंगभं
गादिति तन्न उद्बोधकमाहात्म्येव एवं विधातिप्रसंगवारणे ज्ञानसंस्कार [illegible] योरेव

गा॰टी॰मं

५३

53

ज्ञाना

स्मृतिहेतुत्वासिद्ध्यापत्तेः घटे त्मकानुगतैकजातीयोद्बोधकस्योद्बोधकविरहस्यापि वक्तुमशक्यत्वाच्चेत्य
वधेयं। एवं चेति तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुतायाः प्रवेशे चेत्यर्थः विशिष्टवैशिष्ट्यबोधे विशेष
णविशेषणतावच्छेदकोभयवैशिष्ट्यावगाहिज्ञानत्वेनाहेतुत्वात् दंडेरक्तत्वमिति ज्ञानादुक्तदंडवानिति ज्ञानस्यानु
दयादिति भावः आदिपदात् परामर्शानुव्यवसायपरिग्रहः हेतुतामते चेति मतद्वयेनाप्यस्वरसो दर्शितः न
दूषितं तु उभयसाधारणस्य विरोधितावच्छेदकस्यैकस्याभावेन विरोधित्वस्याननुगतत्वात् तेन रूपेण कां
रणत्वानुपपत्तिः धूमसमानाधिकरणसंताभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधि राम
करणधूमसमानाधिकरणधूमवानित्यादिज्ञानादनुमित्यापत्तिश्चेत्यादिकं प्रागेवोक्तं नितरामिति नाति ॥५३॥
प्रसंगशंकेत्यनुपद्यते। तथैव तादृशरूपावच्छिन्नत्वेनैव। प्रवेशात् हेतुत्वस्य प्रवेशात् अत एव। उ
क्तानुगतरूपावच्छिन्नकारणत्वस्य प्रवेशादेव। ज्ञानत्वेन। निश्चयत्वेन हेतुत्वेपीति प्रतियोगिताव
च्छेदकप्रकारकप्रतियोगिनिश्चयहेतुत्वेपीत्यर्थः नततिः। नातिव्याप्तिः। पक्षादीत्यादिपदाप्यायत्वतेवाप

विशेष्यकपरामर्शएवकारणं तन्मते पक्षविशिष्टव्याप्यस्य संग्रहः तन्मते व्याप्यविशेष्यकपक्षनिश्चयत्वावच्छि-
न्नहेतुताया एव लक्षणे निवेशनीयत्वेन पक्षविशिष्टव्याप्याभावज्ञानं प्रति पक्षविशिष्टव्याप्यनिश्चयत्वेन हेतु-
त्वमतेन तत्रातिव्याप्तिरिति भावः वस्तुतस्तु आदिपदात् ह्रदादिसंग्रहः तस्य प्रकृतानुपयोगित्वेपि सर्वत्र तद्विशि-
ष्टवैशिष्ट्यज्ञानं प्रति तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वादिति सर्वसाधारणकार्यकारणभावासन्नि-
धानवत्प्रसंगात् तत्सन्निधानं हेतुत्वेपीत्यपि शब्देनास्वरसः सूचितः तद्बीजं तु व्याप्यवत्पक्षाभावग्रहं प्रति व्याप्य-
न५ वत्पक्षनिश्चयत्वेन हेतुत्वं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनिश्चयस्य स्वातंत्र्येणाभावधीहेतुतायाः
सामान्यलक्षणायां निराकर्तुमशक्यत्वात् प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानस्याभावज्ञानहेतुत्व-
नयेप्यत्राभावलौकिकप्रत्यक्षं प्रत्येव तस्य हेतुत्वाच्च व्याप्यवत्पक्षाभावस्य लौकिकप्रत्यक्षागम्यः व्याप्तेरतीन्द्रिय-
तया तदवच्छिन्नप्रतियोगिकाभावस्याप्यतीन्द्रियत्वादिति भावः तन्वापत्तावति व्याप्तिः आपत्यनुमित्योरेकरूपे-
णैवपरामर्शस्य हेतुत्वात् किं चैवं यथोक्तवैशिष्ट्यावगाहिनिश्चयत्वमपेक्ष्य लाघवेन पक्षविशेष्यकव्याप्यप्र-

म॰टी
५४
54

कारकनिश्चयत्वेनैव हेतुत्वात्सर्वत्र पक्षविशेष्यकपरामर्शादेवानुमितिनच विनिगमनाविरहः व्याप्यविशेष्यकपक्षप्रकारकनि
श्चयत्वेनैव हेतुता सर्वत्र व्याप्यविशेष्यकपरामर्शादेवानुमितिरित्यस्यापि सुवचत्वात् इति वाच्यं। अनुमितेः पक्ष
विशेष्यकत्वनियमेन अनुमितिसमानविशेष्यकत्वस्यैव विनिगमकत्वात् अत एव पि विशेषोऽध्यवसायकर इति न्याया
त् व्याप्यविशेष्यकपरामर्शात् पक्षविशेष्यकानुमितिस्तु नैव विरुद्धत्वाच्च तथा च पक्षविशेष्यकव्याप्यप्रकारकनिश्च
यत्वावच्छिन्न हेतुताया एव लक्षणे निवेशात् तस्य तौ तादृश विशिष्टवैशिष्ट्यबोधे चातिव्याप्ति दुर्वारैव तत्परस्वरसा राम
दाह। व्याप्यविषयकत्वेनेति तथा च व्याप्यवत्पक्षनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यताशालि
व्याप्यविषयकज्ञानत्वमनुमितित्वं आपत्तौ च व्याप्तिरूपनीतमानसामग्रीसत्त्वेनावश्यं ज्ञानान्नातिव्याप्तिरिति भावः ॥५४॥
केचित्तु आपत्तौ अप्रामाण्यज्ञानास्कंदित व्याप्यवत्पक्षनिश्चयत्वेन हेतुत्वान्नातिव्याप्तिरित्याहुः तन्न एवं ता
दृशनिश्चयत्वावच्छिन्नकारणताविवक्षणे निष्फलमिति वाच्यं यथोक्तोपमितौ ईश्वरीयज्ञानमादाय घटादि
प्रत्यक्षादौ चातिव्याप्तेः वक्ष्यमाणानुभवत्वव्याप्यजातिपदस्यानुभवत्वन्यूनवृत्तिजातिपरतया वह्निव्याप्य

धूमवान् पर्वत इत्यादिपरामर्शेन उद्बोधकविधया जनिते पर्वतो वह्निमानित्यादिस्मरणे व्याप्त्यंशे उद्बोधकमप्राप्यैव तेन जनि
तेऽनेन वह्निधूममात्रप्रकारकस्मरणे चातिव्याप्तेः । न च तद्वारणाय व्याप्तिज्ञानत्वावच्छिन्नकारणत्वमेव प्रवेश्यतां किं प
क्षधर्मतोपादानेनेति वाच्यं शिरोमणिमते तदवच्छिन्नकार्यजनकतावच्छेदकोत्तरव्यापकरूपेणैव तदवच्छिन्नं
प्रतिजनकत्वनियमेन व्याप्तिज्ञानत्वेनाहेतुत्वात् तस्यानुमितित्वावच्छिन्नप्रतिजनकतावच्छेदकस्य परामर्शत्वस्य व्या
पकत्वात् व्याप्तिज्ञानत्वमपेक्ष्य लाघवेन ज्ञानत्वेन मनस्त्वेन वा कारणत्वाच्चेत्संभवापत्तेः । एतेन व्याप्यविषयकत्व
विशेषणेन तत्त्वेऽपि परास्तमित्यनेनान्वयः विशेषणधियः विशेषणतावच्छेदकप्रकारकविशेषणनिश्चयत्वावच्छिन्न
स्य तत्त्वेऽप्यप्रकृतोपयोगित्वात् । विशेषणज्ञानहेतुताविचारस्य प्रकृतानुपयोगित्वात् । हेतुत्वादिति कल्पनादित्यग्रे त्ये४
तनेनान्वितं ननु तथापि स्मृतिं प्रति संस्कारसंबंधेनानुभवं प्रति च साक्षात्संबंधेनेति संबंधाननुगमात् । विशि
ष्टवैशिष्ट्यबोधसामान्यं प्रत्येकरूपेण कारणत्वासंभवः न च संबंधाननुगमस्यादोषत्वादन्यतमत्वादिना यथाकथंचिद्रू
पेणानुगमसंभवाच्चैकरूपेण कारणत्वासंभव इति वाच्यं विशेषणतावच्छेदकप्रकारकविशेषणज्ञानविरहेऽपि

प्र·प्र·
५५
55

त्वे॰ वक्त॰

तद्धोवरादुद्बुद्धसंस्कारवत्त्वं इंद्रियसंनिकर्षानंतरं प्रथमत एव विशिष्टवैशिष्ट्यानुभवापत्तेः नचोद्बुद्धसंस्कारसंबंधेन विशेषणी
यज्ञ्तिवाच्यं अनुद्बुद्धसंस्कारस्यापि कदाचिदुद्बुद्धतया अनुद्बुद्धतादशायां अतिप्रसंगापत्तेरित्यस्वरसादाह नि
र्विकल्पकात्मकस्यस्मरणस्यैवेतिकस्यनादिस्वीकृते तेनान्वितं। नच निर्विकल्पात्मकस्मरणे रवकथं विशिष्टवैशिष्ट्यस्मृति
र्निर्वाहो विशेषणतावच्छेदकप्रकारकज्ञानाभावादितिवाच्यं निर्विकल्पात्मकस्मरणे सति विशेषणज्ञानसत्वादनं
तरं विशिष्टस्मरणसंभवेन तन्निर्वाहात् ननु समानविशेष्यकसमानप्रकारकस्मरणं प्रत्येव संस्कारस्य हेतुत्वा
न्निर्विकल्पकस्मरणमनुपपन्नं। नच तद्विशेष्यकतद्धर्मप्रकारकसंस्कारत्वेन तदतिरिक्तधर्मप्रकारकत्वानवच्छि ।।राम ।।५५।।
न्नतद्विषयताकस्मृतित्वेन कार्यकारणभावान्न निर्विकल्पकस्मरणानुपपत्तिरिति वाच्यं ज्ञातित्वप्रकारकजा
ति विशेष्यकसंस्कारं विनापि जायमाने सघटइत्यादिजातिविशेष   यकस्मरणे व्यभिचारात् घटविशेष्यकघ
टत्वप्रकारकसंस्कारं विनापि घटविशेष्यकद्रव्यत्वप्रकारसंस्कारात् जायमाने घटद्रव्यत्वेऽस्यनिर्विकल्पकस्मरणे
व्यभिचाराच्चेति चेन्न संस्कारस्मरणयोः समानविशेष्यकत्वसमानप्रकारकत्वाभ्यां कार्यकारणभाववत्। तद्विष

षयकसंस्कारत्वेन तद्विषयकस्मृतित्वेन सामान्यतोऽपि कार्यकारणभावांतरसत्वात् सामान्यसामग्रीत एव तत्
संभवात् विशेषणज्ञानाभावेन विशिष्टस्मरणसामग्रीविरहादिति भावः। अत्र निर्विकल्पकानंतरस्मृति
तत्प्रागभावादिकल्पनागौरवमित्यस्वरसादाह अनुभवमिति तस्माद्विशेषणतावच्छेदकप्रकारकविशेष
ण निश्चयत्वावच्छिन्नाया हेतुत्वस्येति कल्पनादित्यनेनान्वितं अत्र केचित् निर्विकल्पकात्मकस्यस्मर
णस्यैवेति। पूर्वोक्तमतमेवसम्यक्। विशिष्टवैशिष्ट्यानुभवत्वमपेक्ष्य लाघवेन विशिष्टवैशिष्ट्यावगाहित्वस्यैव
कार्यतावच्छेदकतौचित्यात् कार्यतावच्छेदकस्य इच्छादिसाधारण्येऽपि क्षतिविरहात् तज्ज्ञाननाशेऽपि इच्छादितः स्म
त्युत्पत्तिस्थले हेतिस्वंस्तानकल्पनात् नचैवमनेतज्ज्ञानव्यक्तिकल्पने गौरवमिति वाच्यं फलमुखत्वेन तस्यादोषत्वा
त् अत एव निर्विकल्पकानंतरस्मृतितत्प्रागभावतद्ध्वंसादिकल्पनाः निर्विकल्पकस्यानुरोधेन तत्तद्वि
षयकसंस्कारत्वेन तत्तद्विषयकस्मृतित्वेनानंतसामान्यकार्यकारणभावकल्पनाच नदोषाय फलमुख
त्वात् नच परित्यज्य निश्चितात्वमिचारकेरूपं गृह्यमाणे व्यभिचारवारकरूपेण कार्यत्वकल्पनायोगात् विशिष्ट

म॰टी
५६
56

वै शिष्ट्यानुभवत्वमेवकार्यतावच्छेदकं नतु विशिष्टवैशिष्ट्यावगाहित्वं तस्यस्मृतिस्थलेज्ञाननाशेपिइच्छादितः स्मृतस्तत्रिस्थ
त्वेचसंदिग्धव्यभिचारकत्वादितिवाच्यं तिष्ठितावत्सिचारकरूपस्य लघुत्वेएवतत्परित्यज्यप्रकारतात्वावच्छिन्नादि
हेतुविशिष्टवैशिष्ट्यानुभवत्वस्य विशिष्टवैशिष्ट्यावगाहित्वमपेक्ष्य गुरुत्वात् इत्याहुः तदसत् फलमुखगौरवस्यापि दो
षतयानिर्वक्तव्यत्वात् तस्मृतितत्प्रागभावध्वंसादिकल्पनामपेक्ष्य लाघवेन विशिष्टवैशिष्ट्यानुभवस्यैव कार्यतावच्छे
दकत्वात् ज्ञानेच्छादिभेदेन विषयितयाविभिन्नत्वेनयेइच्छादिविषयितायटितत्वेनविशिष्टवैशिष्ट्यानुभवत्वमपेक्ष्य वि राम
शिष्ट्यावगाहित्वस्यैव गुरुत्वाच्च एतेन विशेषणज्ञानविशिष्टबुद्ध्योः कार्यकारणभावोपि व्याख्यातः तत्रापि विशि ॥५६॥
ष्ट्यानुभवत्वस्यैवकार्यतावच्छेदकत्वादित्यादिदिक् । नन्वेवमपिविशिष्टविषयोपधानेनस्मृतेः साक्षात्कारव्यभि
चारइत्यत आह नियतइति विषयस्मृतेः ~~[illegible]~~ इति वह्निव्याप्यवत्पर्वत वा ~~व्याप्यवत्पक्षवाविशिष्टविषयस्मृते~~ः नयं
देशाइत्यादिशाब्दबोधेप्रत्यक्षेचेत्यर्थः आदिपदात् साध्यव्याप्यहेतुतावच्छेदकविशिष्टहेतुमत्पक्षत्वपरिग्रहः
नतुविशेषणधर्मिकविशेषणतावच्छेदकसंशयात्मविशेषणतावच्छेदकप्रकारकविशेषणविषयत्वसामान्य

विशिष्टविषयस्मृतेः वह्निव्याप्यवत्पक्षवत्त्वादीति २

धर्ममपहाय संदिग्धव्यभिचारकस्य गुरोस्तादृशसंशयान्यविशेषणतावच्छेदकप्रकारकत्वानवस्यकारणतावच्छेदकमनु
पेयं कथमेतावता तन्नुअस्मच्छास्त्रादरः न च तादृशसामान्यधर्मस्यावच्छेदकत्वे रक्तदंडगोचरानुद्बुद्धसंस्कारवतः पुरुषांशे
लौकिकसन्निकर्षवतो विशिष्टवैशिष्ट्यप्रत्यक्षापत्तिरिति वाच्यं तत्र तादृशप्रत्यक्षस्य रक्तदंडांशे संनिकर्षाभावा
देवानुत्पादात् उपनयस्य ज्ञानत्वेनैव प्रयोजकत्वात् अन्यथाऽनुद्बुद्धसंस्काररूपप्रत्यासत्त्या तद्विशेष्यकमान
सोपनयप्रसंगात् सामान्यप्रत्यासत्तेरप्युक्तत्वेन विशेष्यकं प्रत्येव सामर्थ्यात् इति मैवं संस्कारेच्छादिनिष्ठवि
षयिताघटितत्वे तादृशसामान्यधर्मगुरुत्वात् समनियतः कृतिसाध्यत्वं एवं विषयस्मृतिकल्पनाया अव
कल्पमुखत्वात् विषयसन्निकर्षार्थं तवाप्यावश्यकत्वाच्च किं च तादृशधर्मे एकारणत्वे ज्ञानत्वेतिसंदेहवतः
पुरुषांशे लौकिकसन्निकर्षवतो रक्तदंडांशे च संदेहरूपोपनयस्यैव सत्वात् न च निरुक्तसंशयान्यत्वविहा
य निरुक्तसंशयाविशिष्टत्वमवच्छेदकमुपेयं वैशिष्ट्यं चैककालावच्छेदेनैकात्मवृत्तित्वं उक्तस्थले संस्कारस्तादृ
शसंशयविशिष्ट एव इति नायं दोष इति वाच्यं गौरवात् रक्तदंडगोचरलौकिकसन्निकर्षवतस्तद्गोचरानुद्बुद्धसं

रक्तदंडगोचरानुद्बुद्धसंस्कारवान् लिनश्चरक्तदंडवानिति विशिष्टप्रत्यक्षापत्तिर्दुर्वारा विशेष्यांशे लौकिकसन्निकर्षस्यैव सत्वात् १

मन्दी
५१
५७

के१

स्कारशालिनः प्रथमत एव विशिष्टवैशिष्ट्यबोधापत्तेर्दुर्वारत्वात् न वेष्टापत्तिः तत्र प्रथमं विशिष्टवैशिष्ट्यबोधस्य[illegible]नेना
प्यनभ्युपगमात् अपि च विशेषणतावच्छेदकप्रकारकविशेषणविषयकानुद्बुद्धसंस्कारवतः खंडशः प्रत्येकपदार्थो
पस्थितौ तोपि विशिष्टवैशिष्ट्यशाब्दबोधापत्तिः साध्यतावच्छेदकावच्छिन्नसाध्यविषयकानुद्बुद्धसंस्कारसत्वेप्य
प्रसिद्धसाध्यकानुमितौ साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकत्वापत्तेश्च तत्वसंशयात्पत्तवदनुद्बुद्धसंस्कारा
न्यत्वमपि कारणतावच्छेदकप्रवेशनीयमिति वाच्यं गौरवात् उद्बोधकसमवहितसंस्कारस्यापि केवचिदनुद्बुद्धत
यातद्रूपतादवस्थ्याच्च अथ उद्बोधकानामपि तत्तद्व्यक्तित्वेन विशिष्टवैशिष्ट्यबोधे हेतुत्वात्तादृशानुद्बुद्धसंस्कारमादा ॥ राम ॥५७॥
यनातिप्रसंगः न च विशिष्टवैशिष्ट्यस्मरणे उद्बोधकानां हेतुत्वसंभवेपि विशिष्टवैशिष्ट्यानुभवेन तेषां हेतुत्वसंभ
वो व्यभिचारात् गौरवाच्चेति वाच्यं संस्कारप्रयोज्यविशिष्टवैशिष्ट्यानुभवस्थले तत्र पूर्वं विशेषणतावच्छेदकप्रका
रकविशेषणस्मृतिहेतुत्वेनावश्यकल्पनीयोद्बोधकानामेवसत्वेन व्यभिचाराभावात् अतएव तत्र कारणत्व
कल्पनायामपि न गौरवं न च तामपि कल्पनीयस्मृतिव्यक्तिषु तत्तदुद्बोधकव्यक्तीनां विशेषतो हेतुत्वस्याव

रूपकत्वात्तत्र अत एव विशिष्टस्मृतिव्यक्तिकल्पनागौरवं पुनरधिके संस्कारप्रयोज्यविशिष्टवैशिष्ट्यानुभवस्थलेव फलोपधा
यकतत्तज्ज्ञानादिव्यक्तीनामेवोद्बोधकतया व्यभिचाराभावात्तासां तत्र व्यक्तित्वेन हेतुत्वस्य तत्रावश्यकत
यागौरवस्याप्यभावाच्च नन्वेवं नवतो प्राथमिकविशिष्टवैशिष्ट्यानुभवस्य क्वापि तदुपधायकज्ञानादिव्यक्तीनां
विशेषतो हेतुत्वस्य वक्तव्यतया गौरवे फलमुखगौरवस्यापि दोषत्वादिति वाच्यं तथापि संस्कारप्रयोज्यवि
शिष्टवैशिष्ट्यानुभव सर्वमपि विशिष्टस्मृतीनां कल्पनीयतया तु उत्पत्वादिति चेन्न तत्र व्यक्तित्वेन कारण
तामाहात्म्यसामान्यकार्य्यतीतिप्रसंगवारकेण संशयान्यविशेषणतावच्छेदकप्रकारकविशेषणविषयकत्वे
नापि हेतुत्वस्याप्यनौचित्यापातात् लाघवात् सविषयकत्वेन गुणत्वेन वा हेतुत्वौचित्यात् इति निगर्वः साध्या दे
रित्यादिना हेतुत्वादिपरिग्रहः । हैवादिति सामग्रीसत्वादिसर्थः व्याप्तिविषयिण्यामिति पक्षतावच्छेदकविधया
वा साध्यतावच्छेदकविधया समूहालंबन विधया वा व्याप्तिविषयिण्यामित्यर्थः तस्यां अनुमितौ सापि अव्याप्तिः तादृ
ज्ञाने ति वह्निव्याप्यधूमवत्पर्वतनिष्ठयत्वावच्छिन्नकारणताप्रतियोगिककार्यताशालिव्याप्यविषयक

ज्ञानेत्यर्थः सत्तागुणत्वज्ञानत्वानुभवत्ववारणायानुभवत्वव्याप्येति अनुभवत्वव्याप्यत्वं अनुभवत्वभिन्नवृत्तित्वं तेना-
नुभवत्वनिरासः ज्ञानवृत्तीत्यत्र वृत्तित्वं समवायेन बोध्यं अन्यथा प्रमेयत्वादेरपि कालिकविशेषणतयाऽनुमि-
तिवृत्तित्वेन तमादायातिव्याप्त्यापत्तेः जातिपदं च समवायेन तद्वृत्तित्वलाभायेन नातः कालिकादावतिप्रसंगः । नन्वेवं
व्याप्यविषयकज्ञानवृत्तीत्यत्र ज्ञानपदं व्यर्थं तादृशकार्यताशालिव्याप्यविषयकत्वस्यानुभवत्वव्याप्य-
२ जातिमत्त्वस्यैव सम्भवात् इत्यत आह न वानुभवत्वव्याप्यपदस्यानुभवत्वान्यन वृत्तिपरतया संस्कारस्मृत्योरति-
व्याप्तिवारणायानुभवार्थकं ज्ञानपदमावश्यकमिति वाच्यं वह्निव्याप्यधूमवान्पर्वत इति विशिष्टसंस्का- राम
रस्मृत्योः व्याप्यविषयकत्वेनैव वारणात् अन्यथा तादृशयोरेतयोः तादृशनिश्चयत्वे न हेतुत्वाभावादेव नि- ।।५८।
रासादिति सत्त्व आह एतल्लाभायेति एतादृशजातिमत्त्वलाभायेत्यर्थः अनुभवार्थकं अनुभवार्थकतया
व्याख्याते। एवं चेति उक्तजातिगर्भलक्षणे चेत्यर्थः पृथगिति अन्वयव्याप्तित्वादिरूपेणेत्यर्थः न व्यति-
रेकिण्यनुमितावव्याप्तिरित्यर्थः अन्वयव्याप्तिधीजन्यानुमितिवृत्तिजातेरनुमितित्वस्य स-

यानुमितौ सत्वादितिभावः अनुभवत्वव्याप्यत्वप्रवेशे गौरवादाह। पर्वतेति उक्तयुक्त्या तदुभयवैशिष्ट्यावगाहि निश्च
यत्वेन हेतुत्वाभावादाह। वह्निव्याप्यवदिति वह्निव्याप्यधूमवत्पर्वतवानयं देश इति विशिष्टवैशिष्ट्यबो
धवृत्तिकार्य्यतायामवच्छेदकं ज्ञानत्वं वह्निव्याप्यधूमवान् पर्वत इति स्मृतिवृत्तिकार्य्यतायामवच्छेदकं स्मृ
तित्वं चाह। यज्ज्ञानमात्रे स्मृतिमात्रे चातिव्याप्तिरित्यतो व्याप्यविषयकत्वेत्वीति कार्य्यताविशेषणं अवच्छेदकत्व
मत्रावच्छेदककोटिप्रविष्टत्वमेव वाच्यं अन्यथा वक्ष्यमाणयुक्त्या तत्तत्परामर्शविशिष्टानुमितित्वस्यैव कार्य्य
तावच्छेदकतया अनुमितित्वस्याप्यवच्छेदकतापर्य्याप्त्यनधिकरणत्वादसंभवापत्तेः तथा च परामर्शत्वघ
टकतया धूमत्ववह्नित्वादेरप्यवच्छेदककोटिप्रविष्टत्वाद्धूमवत्त्वाद्यावति व्याप्तिरित्यतो ज्ञानवृत्तिरिति जाति
विशेषणं नन्वेवमपि कार्य्यतावच्छेदकघटकपरामर्शत्वकुक्षिनिविष्टज्ञानत्वमादाय यज्ज्ञानमात्रेऽतिव्याप्तिरित्य
स्वरसादाह। सामानाधिकरण्येनावच्छेदिकाचेति ॥ विलक्षणावच्छेदकतावतीत्यर्थः एतत्स्फोरणाय मुख्य
विशेष्यविधयावच्छेदकत्वमिति प्रयुंजते वृद्धाः अवच्छेदकघटकमात्रे च न रस इति भावः यथाश्रुतं तु न संगच्छते

म॰दी
५९
३६

ज्ञानत्वस्यापि कार्य्यतासमानाधिकरणत्वात् अवच्छेदकत्वाच्चेति । केचित्तु ज्ञानादौ साध्ये ज्ञानसाध्यकानुमितित्वस्य कार्यताव
च्छेदकतया ज्ञानत्वस्यावच्छेदककोटिप्रविष्टत्वेन ज्ञानवृत्तित्वेन च तद्दायज्ञानमात्रेऽतिव्याप्तिरित्यस्वरसादाह सामाना
धिकरण्येनेति अर्थस्तु पूर्ववत् इत्याहुः तदसत् ज्ञानसाध्यकपरामर्शनिरूपितकार्य्यतामादाय लक्षणनिर्वचना
देव तद्दोषवारणसंभवात् । ननु वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन नहेतुत्वं अनुगतकार्यतावच्छेदकस्यैक
स्य वक्तुमशक्यत्वात् न च पर्वतपक्षकवह्निविधेयकानुमितित्वेन कार्य्यत्वमिति वाच्यं धूमालोकादिसकलनिष्ठ — राम
वह्निव्याप्तीनामननुगतैकधर्माभावेनैकोपादानेऽन्यजन्यताहशानुमितौ व्यभिचारापत्तेः न च वह्निव्याप्यधूम
वत्पर्वतनिश्चयत्वेन हेतुत्वं धूमलिंगकपर्वतपक्षकवह्निविधेयकानुमितित्वेन कार्य्यत्वं एवमालोकादिस्थलेऽ
पीति वाच्यं धूमनिष्ठवह्निव्याप्तीनामेव नानाविधतया एकोपादानेऽन्यजन्यानुमितौ व्यभिचारापत्तेः किं च धू — ५९॥
मलिंगकत्वं न धूमज्ञानजन्यत्वमात्रं धूमवान् वह्निव्याप्यधूमेतरो वा पर्वतो वह्निव्याप्यालोकवानित्यादि
परामर्शजन्यानुमितौ व्यभिचारात् न वा धूमज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्य्यताशालित्वं । त

स्येवानुगतजन्यतावच्छेदक
रूपापरिचयात् अथ यत्र घवात्साध्यवदन्यावृत्तित्वज्ञानस्यैवानुमितिहेतुत्वात्तस्य च धूम
मालोकादिनिष्ठस्यैकत्वात् वह्निमदन्यावृत्तिमत् पर्वतनिश्चयत्वेन हेतुता पर्वतपक्षकवह्निविधेयकानुमि
तित्वेन कार्य्यतेति चेन्न वह्निमदन्यावृत्तित्वस्यापि संयोगसमवायादिहेतुतावच्छेदकसंबंधभेदेन भिन्नत्वा
त् यत्र एकसंबंधघटितवह्निमदन्यावृत्तित्वस्योपादानेऽन्यसंबंधघटिततज्ज्ञानजन्यव्याप्तिवारापत्तेः अथ
वह्निव्याप्यधूमवत् पर्वतनिश्चयत्वेन हेतुता वह्निव्याप्यालोकादिमत् पर्वतनिश्चयाजन्यपर्वतपक्षकव
ह्निविधेयकानुमितित्वेन कार्य्यता इति चेन्न वह्निव्याप्यालोकादिमत् पर्वतनिश्चयस्यैवजन्यतावच्छे
दकरूपापरिचयात् वह्निव्याप्यधूमवत् पर्वतनिश्चयाजन्यत्वस्य च तज्जन्यतावच्छेदकत्वेऽन्योन्या
श्रयात् किं च धूमालोकोनयादिलिंगकानुमितिसंग्रहाय वह्निव्याप्यधूमवत् पर्वतनिश्चयाजन्य
त्वसति यद्वह्निव्याप्यालोकादिमत् पर्वतनिश्चयजन्यं तदन्यताद्दृशानुमितित्वेनैव कार्य्यतायाः अवश्यं व

म-८१
६०
60

कत्वात्तत्र आत्माश्रयापत्तेश्च वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वस्य प्रवेशात् न च वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेनेह
तुत्वे तदुत्तरानुमितित्वेन कार्य्यत्वं एवमालोकादेरपीति वाच्यं अनादौ संसारे सर्वासामेवानुमितीनां तदुत्तरत्वात् न
च तदुत्तरत्वे सति तत्कालीनानुमितित्वेन कार्य्यत्वमिति वाच्यं वह्निव्याप्यालोकपरामर्शाज्जायमानायां वह्नि
व्याप्यधूमवत् पर्वतावगाहिन्यां वह्न्यनुमितौ व्यभिचारात् न च तदव्यवहितोत्तरोत्पत्तिकानुमितित्वमेव
कार्य्यतावच्छेदकं अव्यवहितोत्तरत्वं च क्षणद्वयसाधारणं तेन विनश्यदवस्थपरामर्शजन्यानुमितिसंग्रह इति
वाच्यं क्षणद्वयसाधारणाव्यवहितोत्तरत्वस्य सामान्यतो वह्निव्याप्यधूमवत् पर्वतनिश्चयध्वंसाधिकरणक्षण राम
ध्वंसानधिकरणत्वे सति तद   धिकरणक्षणध्वंसाधिकरणत्वरूपत्वेऽप्रसिद्धेः अनादौ संसारे सर्वेषा ॥६०॥
मेव क्षणानां वह्निव्याप्यधूमवत्पर्वतनिश्चयध्वंसाधिकरणक्षणध्वंसाधिकरणत्वात् तत्तद्व्यक्तिध्वं
साधिकरणक्षणध्वंसानधिकरणत्वे सति तत्तद्व्यक्त्यधिकरणक्षणध्वंसाधिकरणत्वरूपत्वे च त
त्तद्व्यक्तिविश्रान्त एव कार्य्यकारणभावः। गौरवं पुनरधिकमिति एतेन स्वसमानाधिकरणस्याव्य

वहितत्पूर्ववृत्तिवह्निव्याप्यधूमवत्पर्वतनिश्चयकत्वमवच्छेदकमित्यपि परास्तं। स्वत्वस्याननुगतत्वात् तस्मात्परामर्षा
नुमित्योस्तत्तद्व्यक्तित्वेनैव कार्यकारणभावः इति यथोक्तक्षणमसंभवि। अथ वस्तुगत्या स्वसमानाधिकरणस्वाव्य
वहितपूर्ववर्त्तिवह्निव्याप्यधूमवत्पर्वतनिश्चयाभाविकायाः अनुमितित्वमत्र यस्तावच्छेदकं तद्विशिष्टानु
मितित्वेन कार्यता तिचेन्न भेदकृतानां विशेषणविशेष्यभावे विनिगमकाभावादनन्तकार्यकारणभाव
स्य दुर्वारत्वात् गौरवं पुनरतिरिच्यते इति व्यतेवह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन हेतुता तादृशनिश्च
यवदनुमितित्वेन कार्यता समवायघटितसामानाधिकरण्यं प्रत्यासत्तिः अनुमितेर्निश्चयवत्त्वं च तत्तन्नि
श्चयव्यक्तिसमानाधिकरणत्वे सति तत्तन्निश्चयव्यक्त्यव्यवहितोत्तरत्वेन संबंधेन अव्यवहितोत्तरत्वं च
क्षणद्वयसाधारणं तेन विनश्यदवस्थपरामर्शजन्यानुमितिसंग्रहः। क्षणद्वयसाधारणाव्यवहि
तोत्तरत्वं च तत्तन्निश्चयव्यक्त्यधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणध्वंसानधिकरण
त्वे सति तत्तन्निश्चयव्यक्त्यधिकरणक्षणध्वंसाधिकरणीयः क्षणस्तद्वृत्तिपदार्थत्वं विनश्यदवस्थापेक्षा

म०टी

६१

एवं

बुध्यात्मकपरामर्शजन्यानुमितेरसंग्रहात्‌ गौरवाच्च किंतु तत्तन्निश्चयव्यक्तिध्वंसाधिकरणत्वे सति तत्तन्निश्चयव्यक्त्यधि
करणसमयध्वंसाधिकरणीयः क्षणः स्वजन्यतदुत्पत्तिकत्वं च अपेक्षाबुध्यात्मकपरामर्शस्थले क्षणत्रयस्य तदन्यस्थले च क्ष
णद्वयस्य संग्रहः। वह्निव्याप्यधूमवत्पर्वतनिश्चयसमकालोत्पन्नलिंगांतरजन्यानुमितौ व्यभिचारवारणाय तद्वृ
त्तित्वं विहायोत्पत्तेः प्रवेशः क्षणत्वप्रवेशोप्यत एव अन्यथा उत्पत्तिक्षणस्थितिक्षणोभयमात्रसाधारणस्थूलका
लोपाधिमादाय तद्व्यभिचारतादवस्थ्यात्‌ न च तादृशसमयध्वंसानधिकरणत्वे सति तत्तन्निश्चयव्यक्तिध्वंसाधिकरणीय
क्षणस्य तद्वृत्तित्वमेव तदस्त्विति वाच्यं। अपेक्षाबुध्यात्मकपरामर्शद्वितीयक्षणोत्पन्नानुमितेरसंग्रहापत्तेः एतच्च सं राम
गविधया प्रविष्टमतस्तत्तद्व्यक्तिघटितत्वेनाननुगतत्वेपि न क्षतिः। स्वरूपसंबंधादेः संबंधाननुगमस्यादोषतया। ॥६१॥
स्वहस्तितत्वात्‌ न चोक्तस्याव्यवहितोत्तरत्वे स्वत्वस्य तत्तद्व्यक्तिविश्रांततया संबंधाननुगम इति वाच्यं खंडशस्ताव
त्संबंधपर्याप्तप्रतियोगितावच्छेदकताकविलक्षणाभावस्य कारणताघटकत्वेन संबंधाननुगमस्यादोषत्वात्‌
अन्यथा स्वस्य संबंधस्य तत्तद्व्यक्तिविशेषणतात्वस्य च अनुगतातिरिक्तपदार्थत्वानभ्युपगंतॄणां प्राचां नये

अन्यत मत्वादिना यथा कथंचिदनुगमस्य संभवात्‌ । अन्यत (न४) मतादेः प्रकारविधया कारणतावच्छेदक [illegible] संबंधतावच्छेदकविधया तद्‌ उपगमात्‌ ॥२

प्रतिबंधकाभावोत्तेजकाभावादेः स्वरूपसंबंधेन कारणत्वतदवच्छेदकत्वस्य नयनये प्रतिबंधकाभावादेः का
र्यसहवर्त्तित्वेन कारणत्वस्य चानुगतस्य दुर्वचत्वापत्तेः किंच संबंधाननुगमस्यादोषत्वे अन्यतमत्वस्य सं
यादि बंधतात्तवच्छेदकत्वे बाधकापदति ष्ट शक्यतावच्छेदकं घटपदत्वादिकमप्यनुगतं दुर्वचं। तद्विघोत्तरत्वं
अनादौ संसारे सर्वस्यैव टकारस्य तथात्वात्। न वा घाव्यवहितोत्तरटत्वं। उक्तयुक्त्याव्यवहितोत्तरत्व
स्य तत्र घत्वे विश्रांतत्वात्। किंतु घवत्त्वटत्वं। मतुवर्थश्चात्र तद्व्यवहितोत्तरत्वं तच्चाप्रामाण्यज्ञानाभाव
विशिष्टवह्निव्याप्यधूमवत्पर्वतनिश्चयत्वे। नैव हेतुत्वं तथा च यत्र वह्निव्याप्यधूमवान् पर्वत इति परा
मर्शानंतरं। पर्वतो वह्निमानित्यनुमितिः। तत्परामर्शोऽनुमित्यात्मकमप्रामाण्यज्ञानं च द्वित्ये ककालः त
त्र तृतीयक्षणे लिंगांतरपरामर्शजन्यानुमित्यं तरं तत्र तदनुमित्यंतरस्याप्यप्रामाण्यज्ञानाभावविशिष्टता
दृशनिश्चयविरहादिति वाच्यं। तत्परामर्शमक्के रेकक्षणसाधारणाव्यवहितोत्तरत्वस्यैव संबंधघ
टत्वात् अप्रामाण्यज्ञानाभावस्य तद्घटने वह्निहेतुतया तस्य कारणतावच्छेदके प्रवेशविरहाच्च यद्वा अप्रा
क

वह्निव्याप्यधूमवत्पर्वतनिश्चयव्यक्तेः क्षणद्वयसाधार

मु०
६२
62

माणपक्षानाभाववविशिष्टतत्तन्निश्चयव्यक्त्यधिकरणक्षणध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिकत्वमव्यवहितो
त्तरत्वमतो नव्यभिचारः [redacted]वह्निव्याप्यधूमवत्पर्वतनिश्चयस्य समवायेन घटादावभा
वात् आत्मघटसंयोगादौ व्यभिचारवारणायानुमितित्वप्रवेशः। तत्र व्यक्तिनिश्चयसामानाधिकरणपविशि
ष्टतत्तन्निश्चयाव्यवहितोत्तरत्वं यदि मत्वर्थः संबंधस्तदा तु न तन्निवेशनीयं। तादृशनिश्चयाव्यवहितोत्त
रान्यपक्षकान्यसाध्यकानुमितौ तस्य कारणत्वव्यवहाराभावात् तद्वारणाय पर्वतपक्षकवह्निसाध्यका राम
नुमितित्वमवश्यं निवेशनीयमित्यपि वदंति॥ केचित्तु वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन हेतुता वह्निव्या ॥६२॥
मु का कु ७ प्यधूमवत्पर्वतत्वधर्मितावच्छेदकवह्निविधेयानुमितित्वेन कार्यता एवमालोकादिलिंगकपरामर्शस्या
पि न च तादृशनिश्चयजन्यानुमितेः पर्वतो वह्निमानित्येव शरीरत्तया कुतो वह्निव्याप्यधूमवत्। पर्वतत्वं त
त्र धर्मितावच्छेदकमिति वाच्यं परामर्शानुमित्योः कार्यकारणभावानुपपत्त्या सर्वत्रानुमितौ लिंगोपहितलैं
गिकभानानुपगमात् धूमवत्पर्वतत्वधर्मितावच्छेदककत्वमात्रोक्तौ वह्निव्याप्यालोकवान् धूमवत्पर्वत

इतिनिश्चयजन्मायां धूमवत्पर्वतो वह्निमानित्यनुमितौ व्यभिचार इति वह्निव्याप्यत्वांतर्भावः। न चैवमपि आलोकादि
लिंगकवह्निव्याप्यधूमवत्पर्वतपक्षकानुमितौ व्यभिचार इति वाच्यं। तत्रापि पक्षतावच्छेदकावच्छिन्नपक्षं विधया
वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वादिनाऽऽऽ तदसत्वेऽनुमितौ लिंगोपहितलैंगिकभानस्य प्रमाणांतरासिद्ध
तया तस्य कार्य्यतावच्छेदकत्वासंभवात्। न च प्रमाणांतरासिद्धत्वेपि कार्य्यतावच्छेदकतयैव तत्सिद्धिरिति वाच्यं।
कार्य्यतावच्छेदकतया ज्ञात्यतिरिक्तपदार्थस्यासिद्धेः अन्यथा वह्निव्याप्यधूमवत्पर्वतत्वधर्मितावच्छेदकत्व
मपेक्ष्य लाघवादखंडोपाधिविशेषस्य घटत्वादिविषयत्वस्य वा तादृशनिश्चयजन्यतावच्छेदकतया सिद्धिरित्य
स्यैव वक्तुमुचितत्वात्। न च घटत्वादिविषयत्वस्य घटत्वादिसाध्यपरामर्शात्मकवह्निव्याप्यालोकादिपरा
मर्शजन्यानुमित्यादावपि सत्वाद्व्यभिचारेण न कार्य्यतावच्छेदकत्वसंभव इति वाच्यं। घटत्वादेर्निर्विक
ल्पकविषयत्वस्य जन्यतावच्छेदकतायाः सुवचत्वात्। किंच यथोक्तस्य कार्य्यतावच्छेदकत्वे वह्निव्याप्यधूमा
भाववान्पर्वत इति स्मरणात्मकबाधनिश्चयोत्तरोत्पन्नवह्निव्याप्यधूमवान्पर्वत इति लौकिकप्रत्य

म० टी

६३
६३

ज्ञात्मकपरामर्शजन्यानुमितेर[illegible]संग्रहः। प्रतिबंधकसत्वेन तत्र पर्वतत्वावच्छिन्नवह्निव्याप्यधूमवत्वमानासंभ
वात् तत्र बाधनिश्चये अप्रामाण्यज्ञान एव अनुमित्यनुपगमे चानुभवविरोधात्। न चैकत्रद्वयमितिन्यायेन
वह्निव्याप्यधूमवत्पर्वतत्वोभयधर्मितावच्छेदकत्वं। कार्यतावच्छेदकं तादृशानुमितिश्च बाधनिश्च
यसत्वेपि संभवति। वह्निव्याप्यधूमवत्वांशे निर्धर्मितावच्छेदकत्वादितिवाच्यं। एकत्रद्वयमिति न्यायेन व
ह्निव्याप्यधूमवैशिष्ट्यावगाहिनिश्चयस्य कारणस्याभावात् इति। केचित्तु वह्न्यादिसाध्यकानुमितावनुगत
वत्पर्वतत्वउभयधर्मितावच्छेदकवह्निव्याप्यालोकादिपरामर्शजन्यतादृशानुमितौ व्यभिचारात् तत्र पर्व
पर्वतत्वधर्मितावच्छेदकवह्निव्याप्यधूम रूपेण कार्यकारणभावाभावेपि यत्रांकुरादिविशेषे एके
नैव व्यापकस्यानुमितिर्जाता तत्र तादृशपरामर्शत्वेन तादृशानुमितित्वेन कार्यकारणभावो
बाधकाभावात्। सु घट एव तथा च तादृशानुमितिमादायैव ज्ञातिगर्भलक्षणं सर्वत्र संगमनीय
मित्याहुः। व्याप्यविषयकवृत्तीत्यत्राखंडाभावतया वैयर्थ्याभावेपि व्याप्यत्वप्रवेशगौरवान्नस्यैवनि

राम
॥६३॥

कर्षमाह व्याप्तिमानिति तादृशानुमित्यविषयः पर्वतो वह्निमानित्यनुमित्यविषयः स्वाभावादिरित्येवं त
थाच्चाभावाद्यविषयकत्वेतीति पर्य्यवसितमिति भावः अत्र वह्न्यादिवारणाय तादृशानुमित्यविषय इति
तादृशानुमित्यविषयत्वस्य जलत्वादावपि सत्वेन तद्विषयकत्वस्य वह्निव्याप्यधूमवत्पर्वतवान्
देश इति विशिष्टवैशिष्ट्यबोधेपि सत्वात्तद्वारणाय व्याप्तिमानेऽवश्यं भासमान[illegible] इति जला[illegible]देरपि
वह्न्यादिव्याप्तिमानेकदाविद्यमानात्तद्दोषतादवस्थ्यमतोऽवश्यमिति । अनुमितित्वस्य कार्य्यमात्रवृत्ति
जातित्वेन कार्य्यतावच्छेदकत्वस्यावश्यकतयाऽनुमितित्वेन कार्य्यता ज्ञानत्वेन मनस्त्वेन वा हेतुतेति सा
मान्यकार्य्यकारणभावस्यावश्यकः एवमेकस्मात्परामर्शात्परपरामर्शजन्यानुमितेरुत्पत्ति
वारणाय तत्तत्परामर्शत्वेन तत्तदनुमितित्वेन विशेषकार्य्यकारणभावोप्यावश्यकस्तथा च तत्तदे
व निर्वाहात् वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन हेतुता तादृशनिश्चयवत्पर्वतपक्षकवह्नि
विधेयकानुमितित्वेन कार्य्यतेत्यादिमध्यविधकार्य्यकारणभावे मानाभाव इति कुतस्तथाविधस्य

म.टी.
६४
64

लक्षणावतारइत्यस्वरसान्मूलोक्तलक्षणमुपेक्ष्य स्वयं लक्षणमाह यांकांचिदिति। यद्वा मूलोक्तलक्षणापेक्ष
यालाघवादाह यांकांचिदिति तत्तद्व्यक्तिसमवेतेति। तत्तद्व्यक्तिसमवेतो यः अनुभवत्वाभावोऽनुभवान्या
समवेतो धर्मस्तत्समवायित्वमित्यर्थः अत्र प्रत्यक्षत्वादिवारणाय तद्व्यक्तिसमवेतेति तद्व्यक्ति
वृत्तीत्युक्तौ प्रत्यक्षत्वादेरपि विषयितया कालिकविशेषणतया विशेषेण वानुमितिव्यक्तिवृत्तित्वात्तद्दो
षतादवस्थ्यं अतः समवेतत्वपर्यंतं तद्व्यक्तित्वं च तादात्म्यसंबंधेन तद्व्यक्तिरेव न तत्र सैव केनरू राम
पेण प्रकारः इति वाच्यं। संबंधविशेषं ज्ञातिमेमतोपि स्वरूपः प्रकारत्वोपगमात्तद्व्यक्तिसंबंधेन ज्ञा ॥६४॥
नत्वादिरेव तत्रेत्यपि केचित् ज्ञानत्वादिवारणाय अनुभवान्यासमवेतेति अनुभवान्यासमवेतेति अ
नुभवान्याद्वृत्तीत्युक्तौ अनुमितित्वस्यापि अनुभवान्यकालवृत्तित्वासंभवं अतोऽसमवेतत्वमुक्तं
अनुभवत्ववारणायानुभवत्वान्येति तादृशधर्मस्यानुमितित्वस्य कालिकविशेषणतया कालेसत्वा
त् अतिव्याप्तिरिति धर्मसमवायित्वमिति समवायेन तादृशवत्वपरं अन्यथा तादृशधर्मसमवा

सान्य

पित्वस्यापि कलिकविशेषणं तथाकालेष न्यान्दोषतादवस्थात् ॥ अथानुभवत्वं नानुभवत्वप्रतियो
गिक भेदवत्वं ॥ अनुभवत्वस्यापि तथात्वात् किंतु अनुभवत्वत्वावच्छिन्नप्रतियोगिताकभेदवत्वं ॥ अनुभवत्व
त्वं च अनुभवान्यासमवेतत्वे सति सकलानुभवसमवेतत्वं ॥ अत्र समवेतत्वं तत्स्वरूपेण पर्याप्तत्व सकलानुभवसमवे
तान्येत्वं वाच्यं तथा च ज्ञानत्वादिवारणायानुभवान्यासमवेतेति ॥ पर्यमिति चेन्न ॥ स्वरूपाभावत्यापत्तेः
तत्स्वरूपेण पर्याप्ताभावात् ॥ अनुभवत्वपदस्वरूपत्वस्य घटित्वावच्छिन्नप्रतियोगिताकभेद विवक्षितत्वात् ॥ अन्ये
तु वस्तुतस्तु अनुभवत्वत्वावच्छिन्नाया प्रतियोगिताया तादात्म्यसंबंधेन भेदोपरि स्वरूपतोऽनुभवत्वं प्रकारइतीति नि
रूपणलक्षणाप्राप्ताकुः ॥ प्रतियोग्यवदिति अनुभवत्वप्रतियोगिक भेदवत्वमनुभवत्वाभाववत्वमिति न तदेयपर्य
गतम्लक्षणप्रापीसाकुः ॥ प्रदर्शनस्वर्गादिशाब्दबोधादौ स्वर्गादिकमनुभवामि इत्यनुव्यवसायाभावात् साक्षात्कारात्मक
मिति ॥ केचित् ॥ ननु स्वर्गादिशाब्दबोधादौ स्वर्गादिकमनुभवामीत्यनुव्यवसायाभावात् साक्षात्कारात्मक
मिति ॥ केचित् ॥ ननु स्वर्गादि तथा प्रत्यक्षात्मकमेवानुभवत्वं ॥ न तदतिरिक्तानां नीतिः ॥ तां त्रिधा शाब्दबोधादौ अ
रा ॥ नन्वेवं तादृशानुव्यवसायात् साक्षात्कारत्वमेवानुभवत्वं ॥ न तदतिरिक्तानामिति ॥ तां त्रिधा शाब्दबोधादौ अप
खे ॥ नुभवव्यवहारस्य मतत्वमहत्वेन व्यवहितं न तत्पाधानुभवत्वान्येतिपर्थमित्याह ॥ अनुभवत्वं जात्यनंगीका
दइति ॥ अनुभवपदप्रवृत्तिनिमित्तस्य जातित्वानभ्युपगमादित्यर्थः तेन नपि घटसिद्धिव्याघातः ॥ न ॥ घटितसम
वेतेति ॥ प्रत्यवयवव्यावृत्तिमत् पूर्ववत् ॥ न च समरणे समवेतेति ॥ स्थाने प्रत्यक्षासमवेतेति वर्थे नो तदपि

म-दी
६५
६६

तिवाच्यं। तथासत्यनुभवत्वजात्यंगीकारे पि तल्लक्षणघटकत्वेनानुभवत्वजात्यनंगीकारे दलस्यापार्थगतत्वापत्तेः।
अनुभवत्वजात्यनंगीकारे तत्र तु शाब्दत्वस्य स्मृतित्वनिवेशे तु विशेषणतावच्छेदकप्रकारविशेष्यक
त्वनिवेशस्य जनकतावच्छेदकघटकतया अनुभवत्वजातिसिद्धिः। स्मृतित्वमपि न तत्र ... विशेषोरवा
त्वनिर्विकल्पकवृत्तिरीश्वरीयप्रमाणपदार्थवत्ता ... त्वादिनामान्यथा ... स्वरूपः। नच विशेष्ये
विशेष्यत्ववद् विमेयत्वलक्षणतावच्छेदकत्वं अनुमित्यादौ व्याप्तिज्ञानादेर्हेतुतयैव गतार्थत्वादिति वाच्यं। अप
प्रसिद्धसाध्यकानुमितेरपि साध्यतावच्छेदकविशिष्टसाध्यप्रकारकत्वापत्तेः। एवं शाब्दे पदार्थोपस्थि
तिद्वयापि विशिष्टवैशिष्ट्यशाब्दबोधापत्तेश्च। न च तथापि तज्ज्ञानेषूपमितिसाधारणप्रमाणाभावः। अ
तिदेशवाक्यार्थज्ञाने हेतुतयैव गतार्थतादिति वाच्यं॥ उपमितौ विशेषणज्ञानजन्यतावच्छेदकघटकमपि
तदेव साध्यवान्तलघुत्वादनुमित्युभयसाधारणं जात्यंतरमिति। केचित्तु। विशेषणज्ञानजन्यतावच्छेदकघ
टकतयैवानुभवत्वजातिसिद्धिः विशिष्टप्रत्यक्षे व्यभिचारात् तावच्छेदकत्वेऽप्रसिद्धसाध्यकानुमि
तेर ... विसाध्यप्रकारकत्वापत्तेरित्याहुः॥ तदसत्। तथा सति तज्जातेः शाब्दबोधसाधारणे मानाभा
वात्। ... पदजन्यपदार्थोपस्थितेर्हेतुतयैव तत्र विशेषणज्ञानहेतुतायागतार्थत्वादित्यत आपत्र
... त्तिरित्याह॥ व्याप्तिज्ञानवेति। अत्र व्याप्तिविशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्नजन्यतामादाय प्रत
साधेताथापरवत जातेरनुगमात्॥ ६॥ ६५

साध्यवति व्याप्तिरतोऽवच्छिन्नान्तं कार्य्यताविशेषणं व्याप्तिज्ञानप्रकार्य्यं । तावच्छेदकावच्छिन्नेत्युक्तौ व्याप्य ।
वत्पक्षज्ञानस्यापि व्याप्तिज्ञानत्वेन तद्दोषतादवस्थ्यमतो व्याप्तिज्ञानत्वावच्छिन्नेति । व्याप्तिविशिष्टबुद्धित्वाव
च्छिन्नजन्यतामादाय प्रत्यक्षेऽदोषो नातिव्याप्तिरतो विशिष्टत्वादि द्वितीयं दलं । व्याप्तिविशिष्टबुद्धित्वावच्छिन्नका
र्य्यतायाः पक्षपरामर्शस्यापि व्याप्तिज्ञानतया परामर्शनिष्ठकारणताप्रतियोगित्वात्तद्दोषतादवस्थ्यमतः प
रामर्शत्वावच्छिन्नेत्युक्तेः कार्य्यतावच्छेदकत्वं च कार्य्यतावच्छेदकतापर्याप्त्यधिकरणत्वं तेन व्याप्तिज्ञानकार्य्य
के तावच्छेदकव्याप्तिविशिष्टबुद्धित्वे पक्षविशिष्टबुद्धित्वावच्छिन्नायां व्याप्याविशिष्टपक्षवैशिष्ट्यबुद्धित्वावच्छिन्नाकार्य
तामादाय प्रत्यक्षे नातिप्रसङ्गः व्याप्तिज्ञानकार्यतावच्छेदकतापर्य्याप्त्यधिकरणव्याप्तिविशिष्टबुद्धित्वादेः
परामर्शकार्य्यतावच्छेदकत्वाप्रवेशात् । नन्वेवं व्याप्तिज्ञानस्य कार्य्यतावच्छेदकतापर्य्याप्त्यधिकरणं धूमो यद्वह्निव्या
प्तिज्ञानाव्यवहितोत्तरानुमितित्वं वह्निव्याप्यधूमवान् पर्वत इति परामर्शस्य तु कार्य्यतावच्छेदकं तादृशपरामर्शा
व्यवहितोत्तरानुमितित्वमित्युभयोर्नैकं कार्य्यतावच्छेदकमिति चेन्न भेदः ।। न च वह्निव्याप्यो धूमः वह्निव्याप्यालोकवान् त
पर्वत इति समूहालम्बनाव्यवहितोत्तरानुमितौ च जन्यपरामर्शसम्बन्धेन धूमीयवह्नि
व्याप्तिज्ञानस्य व्यभिचारितया कारणत्वासम्भवेन तज्जन्यतावच्छेदकमपि तादृशपरामर्शाव्यवहितोत्तरानुमिति
त्वमिति वाच्यं । लाघवात् समवायसम्बन्धेन व्याप्तिज्ञानस्य हेतुतया व्यभिचाराभावात् स्वजन्यपरामर्शसम्बन्धेन हे
तुत्वेऽपि विशेष्ये विशेषणमिति न्यायेन परामर्शस्यानुमितिजनकत्वेन ये यत्र व्याप्तिप्रकारकत्वे तावच्छेदकार्थानां

म०टी
६६
66

तदभावप्रकारकातीन्द्रियगगनज्ञानादितत्प्रकारादि०

खंडशः स्वत्वाविशेष्ये विशेषणमिति न्याये न परामर्शस्तत्र तत्परामर्शजन्यानुमितौ व्यभिचारप्रसंगात् सम
वायसंबंधेन हेतुत्वे परामर्शत्वेन व्याप्तिज्ञानस्यैव तत्र सत्त्वान्न व्यभिचार इति चेन्न यत्रांकुरादि विशेषणे
व व्याप्त्येनानुमितिर्जाता तत्र तत्व्याप्य... नुमितित्वस्यैव व्याप्तिज्ञानपरामर्शजन्यजन्यतावच्छेदकतयातादृशानु
ग मितिनिष्ठकार्यतामादायैव जातिगर्भलक्षणस्यसत्त्वं तत्र संभवेयत्त्वादिति भावः। अत्र वह्नित्वाद्यवच्छिन्नप्रकारतानिरूपितसं
दीज[...]लज्ञलेषु तत्रानुमितिपदं विशिष्टपरामर्शत्वेन हेतुत्वे मानाभावः। अत एव तादृशपरामर्शत्वेन हेतुत्वं तथा
त्रि विव्याप्तिज्ञानत्वेन हेतुत्वे मानाभावः एवं लाघवात् अनुमितिसामान्यं प्रतिज्ञानत्वेन मनस्त्वेन वा हेतुत्वे लाघवानु
मितौ वह्निज्ञानत्वेन कारणत्वं न इति दिक्॥ मि प्रमंते आत्मपरेत्यादि तिविशेषणमिति परं पर्याप्तिविशेषणज्ञानान्यथि
जन्यत्वे नान्वितमित्यर्थः। यथा तथा यारलिंसिषाधियिषविरहविशिष्टसिध्यभावातिरिक्तविशिष्टाभावरूपायादृत्वं
नन्वसिषाधयिषाविरहे[...]लसिद्धेविशिष्ट्येवत्राजावच्छेदनएकाम्रेकतिव्यं तथात्वमत्राजादरयोग्यतयातत्। पूरित ध
र्मावच्छिन्नाभावात्मकपक्षताप्रयोजकत्वाइत्यत आह। विशेष्येति स्वसमानाधिकरणसिद्ध्यभावरूपायाद्रत्वर्थः। विशिष्टाभा ६८
व स्याविशेष्याभाववि शेषणाभावानतिरिक्तत्वे नये वेद्वप्रसिद्ध्यभावस्यापि पक्षतात्वात् विशिष्टाभावस्यातिरि त्त
दो त्वमतेपि यत्रासि तृति षय तिषेसि षा तस्यां सिषाधयिषानो नान्तु त्वादन्तत्वे व स सिध्याभावस्यैव पक्षतो
त्तेति भावः। न तु केवलसिद्ध्यभावोन योग्यः सिद्धिसा मान्यानिश्चयत्वेकत्वस्य तदभावाप्रकारकत्वे घटिते तत्
तदभावप्रकारकातीन्द्रियगगनज्ञानादितत्प्रकारकत्वादिघटितत्वेनातीन्द्रियत्वादित्यत आह। आदिति अपादि

पत्रा० वृत्ति० त आ३ नियुत्त

र्धर्मिसामानाधिकरण्यविशेषणताभावप्रयोज्यः विशिष्टाभावस्यानतिरिक्तत्वान्नये केवलव्याप्यधर्मिसाधिकरः
केवलव्याप्यधर्मिसाधाया अपि पक्षतात्वात् विशिष्टाभावस्यातिरिक्तत्वनये विषयविशेषविशेष्यसिसाधयिषा
याः सत्त्वामेवानुमितिमात्रकेवलव्याप्यधर्मिसाधायाएव पक्षतात्वाचेति भावः। सहस्र[redacted]तं तु व्याप्यविशिष्टपक्षस्मृते
व्याप्यवत्पक्षाभावे हेतेनस्य च चारणाच्चेति भावः। तत्त्वेन परामर्श[redacted]त्वेन क्रमेण व्याप[redacted]त्तिमात्रतेनेति। बाधादि
[redacted]ज्ञाने सत्यनुमितिसामग्र्यभावप्रदर्शनाय आदिनासत्प्रतिपक्षपरिग्रहः दैवात्सामग्रीविलम्बात्प्रतिपु
नोविषयत्वेनेति[redacted]सिसाधयिषाविरह विषयत्वेनेत्यर्थः। पक्षतायाः पक्षादिति सिसाधयिषाविरहाभावत्वे
न सिसाधयिषाप्रयुक्तैत्यर्थः। तत्रापि घटतायां सिसाधयिषारूपायाः पक्षतायाहेतुत्वात्। परामर्श[redacted]त्वच
सिसाधयिषाविरहसत्तानात्मकतयाप्रतियोगितेनत्वेहेतुत्वादिति भावः। एकत्वेच्छेदेन तस्य व्याप्तिमाहतदुभ
येति। बाधादिज्ञानोपक्षतापरामर्श[redacted]शोभयपरामर्शत्वं वनेत्यर्थः तत्र विषयविधया[redacted]उभयोरेव हेतु
त्वादिति भावः। न च एकावच्छेदेनेति विवक्षा[redacted]तायाजन्यतावच्छेदकं लिंगाघटितपर्वतपक्षकवह्निविधेयका
नुमितित्वमात्रंपरामर्शस्य[redacted]लिंगघटितमित्यसंभवइतिवाच्यं। तत्रापि लिंगघटनायावच्छिन्नमात्रलौल्यात्पक्षता
जन्यतावच्छेदकतायव्यापाधिकरणावच्छिन्नपरामर्शजन्यतायाएवमप्यनपायाबाधा। भिन्नन्ये परामर्शजन्यता
वच्छेदककोटावपुनःपुनःत्यापर्वतपक्षकवह्निविधेयकानुमितित्वस्यावश्यंप्रवेशात्[redacted]न च पक्षतावच्छेदक
सामानाधिकरण्येनासिध्यभावघटितायाः पक्षतायाः कार्यतावच्छेदकं न पर्वतपक्षकवह्निविधेयकानुमि

ना न न

ता लेपक्षप

पक्षकरणा॰ २

म॰दी

६१ तिस्त्वमात्रं ॥ अपि तु पर्वतत्वसामानाधिकरण्यमात्रेण वह्निविधेयकानुमितित्वं तच्च न परामर्शजन्यतावच्छेदक

प्रविष्टमिति वाच्यं । पर्वते वह्निविधेयकानुमितित्वस्य पक्षतावच्छेदकावच्छेदेन सिद्ध्यभावघटितायाः पक्षतायाः

६८ जन्यतावच्छेदकत्वेन तादृशपक्षताया माहात्म्यलक्षणसंगतेरिति न काप्यनुपपत्तिरिति ॥ अत्रापि तत्साध्यकत्वानुग

मादेकोपादानेऽन्यत्राव्याप्तिरित्यत आह तद्वृत्तीति पक्षतासहकृतपरामर्शजन्यसमवेतेत्यर्थः ॥ तद्वृत्तित्वमि

ति विवक्षितं तु परामर्शप्रयोज्यप्रतिपरामर्शत्वेन हेतुतायाः पूर्वमेव निराकृतत्वात् परामर्शत्वेन जन्य

तिविवक्षैव पक्षतापरामर्शोभयसमूहालंबनवारणायावच्छेदेति न च विषयविधया परामर्शजन्यत्वे

न तदुभयसमूहालंबनेऽपि व्याप्त्यभावविपरामर्शानुव्यवसायस्यापि पक्षासहकृतत्वेन व्याप्यादिविषयकत्वेनाव

क ॥ गाहित्वाद्व्याप्यप्रकारकपक्षविषयत्वेनापि तद्धेतुत्वादतिव्याप्तेरिति वाच्यं ॥ मि— अनयविशिष्टवैशिष्ट्य ॥ पक्षे

बोध्यं प्रति विशेषणतावच्छेदकप्रकारकविशेषणनिश्चयत्वेनाहेतुत्वात् । नव तथापि सुखव्याप्यदुःख

व्याप्यवान्नात्मा नास्ति सुखवानुमितिविषय इति समूहालंबनप्रत्यक्षेऽतिव्याप्तिवारणाय एकावच्छेदेन

तिविवक्षणमावश्यकं प्रतियोगितावच्छेदकं स

प्रकारकप्रतियोगिज्ञानस्याभावाल्लौकिकप्रत्यक्षहेतुतया तत्र परामर्शत्वेनापि जनकत्वसत्त्वादिति वाच्यं व्याप्तेरतीन्द्रियत्वे यात्
च्छिन्नप्रतियोगिताकाभावस्य लौकिकप्रत्यक्षासंभवात् किं च न्नरुक्तयुक्त्या अनुमितिं प्रत्यपि परामर्शत्वेन हेतुत्वाभावादसंभव इति ध्येयं
॥ अत्र मिश्रानुयायिनः। पक्षताजन्यत्वसमव्याप्यं यत्परामर्शजन्यत्वं तद्वत्त्वं लक्षणं वाच्यं न तु परामर्शत्वावच्छिन्नकारणतादिकं इत्यादि
प्रवेशनीयं मिश्रैस्तथा कुत्राप्यनुल्लेखनात् पक्षतापरामर्शोभयसमूहालंबने च न पक्षताजन्यत्वव्याप्यं परामर्शजन्यत्वं विषयविधया परामर्श
स र्शजन्यत्वस्य समूहालंबनात्तिरिक्तेपि सत्त्वात् न च विषयस्य विशेषतो पि कार्यकारणभावाद्विषयविधया एतत्परामर्शजन्ये पक्षताया
प्रत्यक्षे च परामर्शजन्यत्वव्याप्यं न पक्षताजन्यत्वं विषयविधया पक्षताजन्यत्वस्य परामर्शाजन्येपि सत्त्वादित्यस्वरसमुद्भावयंति। अन्ये तु। प
क्षताजन्यत्वे सति परामर्शजन्यत्वं इत्यत्र परामर्शपदं यस्मात्परामर्शादव्यवहितोत्तरमनुमितिरनंतरमनुव्यवसायः तादृशपराम × ताजन्य
त्वव्याप्यमेवेति वाच्यं मिश्रमते विषयस्य विशेषतो हेतुत्वाभावात् एवं प्रतियोगिज्ञानविधया परामर्शजन्ये पक्ष × र्श विशेषपरं न तु परामर्शत्वा
वच्छिन्नकारणतादिकं प्रवेशनीयं इत्थं च पक्षतापरामर्शोभयसमूहालंबने प्रतियोगिज्ञानविधया परामर्शेण जनिते पक्षताप्रत्यक्षे वानातिव्या ट
(त ४ अ) प्तिः तत्परामर्शव्य × नां लक्षणे प्रवेशात् न चैवं बाधादिना शेसति तत्परामर्शेण जनितायामनुमितावव्याप्तिरिति वाच्यं लक्षणस्य जातिघ
टिततया आवश्यकत्वेन तत एवाव्याप्तिनिरासादित्यस्वरसमुद्भावयंति। तदुभयमप्यसत्। तथापि अनुमितिं प्रत्यपि पक्षतायाहेतुत्वस्य नि
राकर्तव्यत्वादसंभव इत्यस्वरसस्य दुरुद्धरत्वात्। केचित्तु। अनुमितित्वस्य कार्यमात्रवृत्तिजातितया तदवच्छिन्नं प्रति परामर्शत्वेनैव
कारणत्वं परामर्शत्वं। न चानुमितित्वावच्छिन्नं प्रति हेतुतावच्छेदकतया सिद्धो जातिविशेषः न च चाक्षुषत्वादिना संकरः तस्य मानसत्वव्याप्य

प्र॰टी॰ ६८ ·68

निरिष्ट

त्वाभ्युपगमत्वात् सर्वत्र मानसपरामर्शादेवानुमितिः। यत्र च। चाक्षुषादिपरामर्शस्तत्रापि तदनंतरं मानसपरामर्शाभ्युपगमात् क्षणविलंब
स्य शपथनिर्णेयत्वात् न च पर्वतचक्षुःसंयोगादेः प्रतिबंधकस्य सत्वेन कथं मानसपरामर्श इति वाच्यं तदुत्तरं चाक्षुषाद्यनुत्पादस्योभयवादि
सिद्धतया चक्षुःसंयोगादेश्चक्षुर्मनःसंयोगादेर्वा सत्वे मानाभावात् मानसप्रत्यक्षं प्रति मानसेतरज्ञानसामग्र्याः मानसेतरज्ञानत्वेनैव प्रतिबं
धकतया चक्षुःसंयोगादेः सत्वेप्यकिंचित्करत्वाच्च। न च विनिगमकाभावात् चाक्षुषादिव्याप्यं किं नांगीक्रियत इति वाच्यं सर्वत्र चाक्षुषादिपरामर्श राम
स्यासंभवात् अथ तथापि विनिगमकाभावात् स्मृतित्वव्याप्यमेव किं नांगीक्रियते सर्वत्र स्मरणात्मकादेव परामर्शादनुमितिरित्यस्यापि सुवचत्वा
त् न च स्मृतित्वव्याप्यत्वे कल्पनीये तत्तत्स्मृतिव्यक्तिं प्रति तत्तदुद्बोधकव्यक्तेः स्ततद्व्यक्तित्वेन हेतुत्वकल्पनायां गौरवमिति वाच्यं तवापि कल्पनीय
विशिष्य तत्तन्मानसपरामर्शव्यक्तिं प्रति तत्तद्विशेषणज्ञानव्यक्तेर्विशिष्य हेतुत्वकल्पनस्यावश्यकतया तुल्यत्वादिति चेन्न स्मृतित्वव्याप्यत्वे यत्रोपेक्षात्म
क चाक्षुषादिपरामर्शानंतरमनुमितिस्तत्र तत्परामर्शस्यानुपेक्षात्वं कल्पयित्वा संस्कारव्यक्तिकल्पने गौरवात् न च तस्योपेक्षात्वे तद्भेदेपि संस्कारज
नकतावच्छेदके प्रवेशनीय इति तस्यानुपेक्षात्वकल्पनमेव लघीयः संस्कारव्यक्तिकल्पनं च फलमुखमिति वाच्यं उपेक्षाज्ञानानां तत्तद्व्यक्तित्वाव
च्छिन्नप्रतियोगिताकभेदकूटस्य न संस्कारजनकतावच्छेदकत्वमपि तु फलोपधायकतासंबंधावच्छिन्नतत्तद्विशेष्यकतत्तत्प्रकारकस्मृत्यभावव
ज्ञानत्वावच्छिन्नप्रतियोगिताकस्यैकस्य सामान्यभेदस्याभ्युपगमात् न च भक्तित्वश्रद्धात्वयोरपि मानसत्वव्याप्यजातित्वात्ताभ्यां सह संकर इति वा
च्यं भक्त्याद्यात्मकपरामर्शस्यानुमितिजनकत्वे मानाभावात् कार्यकारणभावानुपपत्तिविरहेण भक्तित्वश्रद्धात्वयोर्जातित्वाभावेपि क्षतिवि
रहाच्च न च तुल्ययुक्त्या प्रवृत्तित्वावच्छिन्नं प्रति जनकतावच्छेदकतया इष्टसाधनताज्ञाने शाब्दत्वावच्छिन्नं प्रति जनकतावच्छेदकतया पदज्ञा
नादौ च मानसत्वव्याप्यजातिविशेषसिद्धेरप्रत्यूहत्वात्तामादाय परामर्शात्मकेष्टसाधनताज्ञाने परामर्शात्मकपदज्ञानादौ च सांकर्य

वाच्यं अनुमित्युपधायकपरामर्षात्मकइष्टसाधनताज्ञानस्यतादृशपदज्ञानादेश्चप्रवृत्तौशाब्दबोधादौचाजनकत्वात् यत्र चैतंब
रामर्षात्मकमिष्टसाधनताज्ञानादितत्राप्यनुमि[illegible]त्युत्तरं पुनर्भोनसेष्टसाधनताज्ञानादिततःप्रवृत्त्यादीतिफलबलेनकल्पनाद्दि
नचसामान्यतःपरामर्षत्वेनहेतुत्वेवह्निव्याप्यधूमवत्पर्वतपरामर्षादपिघटानुमितिप्रसंगइतिवाच्यं तत्परामर्षत्वेनतत्तदनु
मितित्वेनविशेषकार्यकारणभावेनैवातिप्रसंगभंगात् अथैवं अनुमितित्वावच्छिन्नंप्रतिज्ञानत्वेनैवमनस्त्वेनवाहेतुत्वसंभवेनता | राम
दृशज्ञातोभानाभावःविशेषकार्यकारणभावेनैवातिप्रसंगभंगात् नचसत्तागुणत्वद्रव्यत्वमादायविनिगमनाविरहइतिवाच्यं तस्य
ज्ञानत्वाद्यपेक्षयाव्यापकधर्मत्वेनान्यथासिद्धत्वात् नचपरामर्षत्वापेक्षयाव्यापकधर्मत्वेनज्ञानत्वमप्यन्यथासिद्धमितिवाच्यंप्रमा
सत्वे | णांतरसिद्धव्याप्यधर्म[illegible]व्यापकधर्मस्यान्यथासिद्धत्वात् अत्रचपरामर्षत्वस्यचजनकतावच्छेदकतयैवसिद्धत्वेनप्रमाणांतरा
सिद्धत्वात् नचतथापिरूपत्वरसत्वादेर्घटत्वपटत्वादेश्चावच्छेदकेकिंनस्यात् यदि चरूपादावनुमितिकारणव्यवहाराभावात्तेन | तं
रूपेणकारणत्वं तदाज्ञानादिमात्रेऽनुमितिकारणव्यवहाराभावात्ज्ञानत्वादिनापिनहेतुत्वमितितुल्यमितिवाच्यंज्ञानत्वकार्यत्वादि
नाकार्यकारणभावमादायज्ञानादिमात्रेऽनुमितिकारणव्यवहारस्यतत्रापिसंमतत्वात् नचतवज्ञानमात्रादौअनुमितित्वावच्छिन्नंप्रति
ण | कारत्वव्यवहारापत्तिरितिवाच्यंपरामर्षत्वेनहेतुत्वेपिवह्निव्याप्यधूमवान्पर्वतइत्यादिप्रत्येकपरामर्षेऽनुमितित्वावच्छिन्नं[illegible]
प्रतिकारणव्यवहारापत्तेर्दुर्वारत्वात् तदवच्छिन्नंप्रतिकारणतावच्छेदकस्यपरामर्षत्वस्यप्रत्येकमपिसत्वात् इष्टा[illegible]पत्तेश्चउभयमत

ग·टी·
६९
69

त्वा.क१ क२

साधारणत्वादिति चेन्न अनुमितित्वावच्छिन्नं प्रति ज्ञानत्वादिना हेतुत्वे इच्छाकृतित्वात्मत्व[illegible]संयोगादिमादाय विनिगमनाविरहाप
त्तेः इच्छात्वादिनापि कारणत्वाभ्युपगमे बहुतरकार्यकारणभावापत्तेः। न च परामर्शत्वजातिस्वीकारेपि इच्छादिमादाय विनिगमनावि
रह इति वाच्यं कल्पनीयव्यक्तौ लाघवव्यक्तिमादाय विनिगमनाविरहस्यानुद्भाव्यत्वात् इत्थं च परामर्शत्वेन हेतुतैव लक्षणे निवेशनीया
जातिघटनापि च न कर्तव्या वह्न्यादिसाध्यधूमादिहेतुकपरामर्शस्य परामर्शत्वावच्छिन्नकारणताप्रतियोगिककार्यतायाः अनुमितिमा
त्र एव सत्त्वात् चरमज्ञानं चापत्तीतरत्वेन विशेषणीयं तेनापत्तावपि तथा हेतुत्वेपि नातिव्याप्तिरिति यथाश्रुतमूलोक्तलक्षण
मेव संगमयंति। तदसत्। परामर्शत्वजातिस्वीकारेपि सा जातिर्ज्ञाने वा कल्प्यते इच्छादौ वेत्यत्र विनिगमनाविरहस्य दुर्वारतया त
ज्जातौ मानाभावादिति संक्षेपः॥ अनुमितिलक्षणरहस्यं। तत्करणमित्यत्र तत्पदस्य स्वरूपतोऽनुमितित्वजातिविशेषविशिष्टप
रत्वे पौनरुक्त्यापत्तिरतो यथोक्तलक्षणविशिष्टपरमेव तत्पदमित्यभिमानेनाशंकते नन्वेति। व्याप्तिज्ञानत्वत्वरूपहेतुतावच्छेदक
प्रकारेण व्याप्तिज्ञानत्वस्याप्रवेशान्न वैयर्थ्यमत आह तादात्म्येनेति। यद्यपि तत्त्वावच्छिन्नकारणतायां स्वरूपतो व्याप्तिज्ञानस्यैव
प्रकारीभूय प्रवेशाद्व्याप्तिज्ञानमपि व्याप्तिज्ञानत्वेन न नु प्रविष्टं तथापि परामर्शविशिष्टानुमितित्वस्य कार्यतावच्छेदकतया तद्घटकत
या तस्य निवेशो बोध्यः। ननु व्याप्तेरनुनुगमेनानुमितिकरणमात्रस्य पक्षत्वाद्भागासिद्धिरिति तादृशज्ञातिमत्करणत्वं हेतुरित्यत
आह। अधिकस्येति। तथा च व्याप्तिग्रहानौपयिकव्यभिचाराचारकतया वैयर्थ्यमिति भावः। व्याप्तिज्ञानत्वादेरित्यादिना तादात्म्यसं

त्वाराम
६.

व्याप्तिज्ञानस्यपरिग्रहः।अतिप्रसक्तत्वादिति।फलानुपधायकस्वरूपयोग्येपिसत्वात्तथाचलद्व्यस्यानुमितिफलोपहितकरणस्य
तरभेदसाधनेव्यभिचारः।तादृशजातिमत्करणत्वस्यहेतुत्वेतुफलोपहितकरणत्वस्यविवक्षणान्नव्यभिचारइतिव्यभिचारवारकत्वे
नसार्थकमितिभावः।पक्षसंकोचनिबंधनारुचेराह करणत्वेतितादृशज्ञानत्वत्वावच्छेदकत्वाद्व्याप्तिज्ञानत्वत्वादिनाऽवच्छेद्यत्वासंभ
वात्।आदिपदात्व्याप्तिज्ञानत्वपरिग्रहः।तथाचयन्निष्ठायन्निरूपिताव्याप्तिर्येनविशेषणेनविनागृहीतुंनशक्यतेतत्तत्रसार्थमिति
न्यायेनधूमप्रागभाववत्त्वेवैयर्थ्यमितिभावः।यद्यपिकरणत्वस्यकारणतावच्छेदकरूपाभिन्नतयाव्याप्तिज्ञानत्वमेवकरणत्वमितिकरण
त्वनिष्ठव्याप्तिरपिव्याप्तिज्ञानत्वेनावच्छेत्तुंशक्यतएव।तथापिकरणत्वसामान्यनिष्ठव्याप्तेर्व्याप्तिज्ञानत्वत्वेनावच्छेत्तुंनशक्यतेसाध्यसा
धनभेदेनव्याप्तेरननुगतत्वादितिहृदयं।केचित्तु।तादात्म्येनव्याप्तिज्ञानस्यहेतुत्वपक्षेदूषणमिदंकरणत्वमतिरिक्तमित्यभिप्रायेणावत्ता
हुः।व्यतिरेकव्याप्तेरितिइतरभेदानुमानस्थलेव्यतिरेकव्याप्तेर्गमकतयेत्यर्थः।वैयर्थ्यशंकेति।हेत्वभावस्यसाध्याभावव्यापकत्वेयाहेतादृश
जातिमत्करणत्वत्वानवच्छिन्नाभावोपिभिन्नःव्याप्तिज्ञानत्वत्वाद्यवच्छिन्नाभावोपिभिन्नइत्यखंडाभावत्वेनवैयर्थ्याभावादित्यर्थः।अनुमिति
करणस्य।अनुमितिकरणसामान्यस्य।यद्यपितदभावेपिनक्षतिरितिप्रयुक्तंतथापिनिखिलानुमानस्यैवानंतरनिरूप्यतयासर्वत्रैवप्र
त्यक्षोपजीवकत्वलक्षणासंगतिरपेक्षितेतिभावः।ज्ञानाकरणकेति।ज्ञानाकरणकज्ञानसमवेतानुनवत्वव्याप्यजातिमत्त्वस्यप्रत्यक्ष
लक्षणत्वादितिभावः।अत्रचधारावाहिकप्रत्यक्षेविशिष्टवैशिष्ट्यप्रत्यक्षेश्रवणकरणकात्मकसाक्षात्कारेचाव्याप्तिवारणायजातिघट
नेतिमंतव्यं।तज्ज्ञानाकरणत्वंकश्चिदित्यस्वरसोद्भावनंतद्बीजंतु प्रत्यक्षस्यलक्षणांतरसंभवइतिकिंचलिंगकरणत्वबादिनापिज्ञान

रा॰राम

म॰टी

६०

७०

करणत्वाभ्युपगमात्ज्ञानाकरणकत्वमेवनास्तीति।ननुपरेषांअनुमितिकरणत्वस्याप्रसिद्ध्याकथंतेनरूपेणपक्षत्वमित्यतोव्याच
ष्टे।अनुमानत्वेनाभिमतमिति।नैयायिकेनानुमानत्वेनाभिमतमित्यर्थः।तथाचधूमादिज्ञानत्वेनैवपक्षतेतिभावः।ननुअभिमत
त्वांतस्यप्रवेशः'अनुमानत्वाप्रसिद्ध्यातदभिमतत्वस्याप्यसिद्धेः।नचैवंअभिमतांतोपादानवैयर्थ्यमितिवाच्यंधूमादिज्ञानत्वेनपक्ष
तायामपिननैयायिकानांसिद्धसाधनसंभवइतिबोधनायतदुपादानादितिध्येयं।अनुमानमेवअनुमितिकरणत्वावच्छिन्नमेवन
चैवंतत्रकथंप्रमितिकरणभेदःसाधनीयःअलीकाधिकरणकाभावानभ्युपगमादितिवाच्यं'अलीकाभावांतरानभ्युपगमेपिअन्योन्या
भावस्यपरैरभ्युपगमादितिभावः।ननुनिर्विकल्पकविषयकत्वंसंवादःसचनसंभावनायांनिर्विकल्पकस्यसन्मात्रविषयकत्वात्
संभावनायाश्चसविकल्पकत्वेनासद्विषयकत्वात्इत्यतोव्याचष्टेसंवादाभिमानेति।तथाचवस्तुगत्यासंवादस्यतत्रासत्त्वेपिसंवाद
भ्रमात्प्रमात्वभ्रमइतिभावः।आख्याबीजंस्वयमेवस्फुटयतिसंभावितस्येति।संभावनाविषयीभूतस्येत्यर्थःअनुगताकारस्यअनु
गतधर्मवद्व्यक्तित्वादिविशिष्टतत्तयेऽनुगतधर्ममात्रस्यालीकत्वात्सहसतोऽस्यसंबंधाभावात्विशिष्टोप्यलीकइतिभावःस्वलक्ष
णंव्यक्तिःतन्मात्रसाक्षिणातन्मात्रविषयिणाअध्यक्षेणनिर्विकल्पकेनअनुल्लेखनात्।अविषयीकरणात्तथाचवस्तुगत्यानिर्वि
कल्पकविषयविषयकत्वरूपसंवादःसंभावनायांनास्तीतिभावः'अध्यक्षेति।संभावितइत्यनुषज्यतेसंभावनाविषयीभूतस्य
निर्विकल्पकमूलकसविकल्पोल्लिखितविषयकमेवसंवादइत्यर्थःतथाचनिर्विकल्पकमूलकसविकल्पकवन्निखिलविष
त्वमेवसंवादइतियथाश्रुतमूलमेवसाधुरितिभावः।ननुअथानुमानंनप्रमाणंइत्युपक्रमादितिनाप्रत्यक्षंप्रमाणमित्युपसं

राम

विरोध इत्यत आह अनुमानेति। समयनिर्णयादीति समयः शक्तिः आदिना तात्पर्यनिर्णयादिपरिग्रहः। प्रवृत्तिः फलजननं इती
तिं तथा चेदमपि स्वातंत्र्येण प्रवृत्तिं तरं ननु तस्योपरम इति भावः। अप्रमाणसाधर्म्यस्य अप्रमाणवृत्तिधर्मवत्त्वरूपस्य अप्रामाण्य
साधने व्यभिचारित्वादाह प्रमाणताप्रयोजकेति। प्रमाणताप्रयोजकं च तन्मते इंद्रियत्वमेव अस्माकं मते व्याप्तिनिश्चयत्वादिकमपीति
भावः। मूले दृष्टसाधर्म्यस्य ज्ञायमानप्रमाणताप्रयोजकरूपशून्यत्वस्य यन्मते लिंगज्ञानं करणं तन्मते दृष्टसाधर्म्यस्य ज्ञायमानप्र
माणताप्रयोजकरूपशून्यत्वरूपस्यानुमानत्वं न संभवतीति तन्मतसाधारण्यार्थं पूरयति साधर्म्यदर्शनस्य वेति प्रमाणताप्रयोज
करूपशून्यत्व ज्ञानस्य वेत्यर्थः। अभिहितमेव साधर्म्यदर्शनमिति। प्रमाणताप्रयोजकरूपशून्यत्वज्ञानरूपं साधर्म्यदर्शनमित्यर्थः।
संभवानां अनुमाने ऽप्रामाण्यसंभावनां भावयति उत्पादयति। नन्वेवमनुमानस्याप्रमाणत्वेन व्यवहारः कथं स्यात् तत्राप्रामाण्यवि
शिष्टज्ञानाभावात् परकीयसंदेहादिनिर्णयं विना तच्छुद्धस्वरूपस्य फलस्य निर्णयासंभवाच्चेत्यत आह संभावनेनैवेति। तथा च पर
कीयसंदेहादिकमपि संभाव्यैव तादृशव्यवहार इति भावः। अगृहीतभेदज्ञानद्वयात्मकभ्रमजनकत्वेपि अप्रमाण्याभावभ्रमित्यस्वीका
रेण नोक्ताप्रामाण्यव्याघात इत्याशयेनाह आपातत इति। प्रमाकरणत्वव्यतिरेकमिति। अप्रामाण्यं निरूपयाम इत्यनुषज्यते। अनुगताका
रासंस्पर्शिनि अनुगतधर्मविशिष्टाविषयिणि। परमार्थसदिति। परमार्थसत् स्वलक्षणं व्यक्तिस्तन्मात्रविषयिणीत्यर्थः। स्वसंवेदनेति
स्वात्मकं यत्संवेदनं ज्ञानं तेन संविदितं विषयीकृतं प्रामाण्यं यस्येत्यर्थः। तदुत्तरभाविनि। निर्विकल्पकोत्तरभाविनि। समुल्लिखितेति। वि

म·दी
७१
७।

२·२००

स्व२

निर्विकल्पकस्येति॥ तथापीत्यादि॥ सन्मात्रावलंबनमिति
षयीकृतालोकानुगतधर्मविशिष्टकेऽत्यर्थः॥ निर्विकल्पकस्येति॥ तथापीत्यादि॥ सन्मात्रावलंबनमिति
असद्विषयकत्वमित्यर्थः अन्यथा तन्मते सद्विषयकत्वस्य प्रामाण्यरूपतया स्वतएव ग्रहादसंगतत्वापत्तेः॥ अनुमा
नाधीनेति॥ सद्विषयकहेतुना असद्विषयकत्वस्य प्रकाशत्वहेतुना स्वविषयत्वस्य अनवस्थानियामकस्वेतराग्र
प्रामाण्यकत्वे सति याह्यप्रामाण्यं कत्वहेतुना चस्व प्रामाण्यावगाहित्वस्यानुमानादिति भावः॥ स्वर्वमिदं अनुमानादि
प्रामाण्यसाधनं॥ ननु व्याप्तिग्रहोपायश्च वक्ष्यते इत्युक्तं निरूप्यते व्याप्तिरित्यर्थान्तरत्वमित्यत आह समारब्धेति समारब्धा
या अनुमानप्रामाण्य परीक्षा अनुमानप्रामाण्यसाधनं तत्कारणीभूतो व्याप्तिग्रहस्तदुपायप्रतिपादननिदानमित्यर्थः
व्याप्तिज्ञानं विना अयं व्याप्तिग्रहोपाय इति ज्ञातुमशक्यत्वात् व्याप्तेस्तत्र विशेषणत्वादिति भावः॥ तथा च व्याप्तिग्रहोपा
याभिधानोपयुक्तत्वेन तन्निरूपणमिति हृदयं॥ अव्याप्यवृत्तीति॥ कपिसंयोगी वृक्षत्वादित्यादावित्यर्थः॥ आव्या ७१
प्यं अ असत्वं अतएव सद्धेतावित्युक्तं असद्धेतावसत्वस्यादोषत्वात्॥ केचित्तु कपिसंयोगवान् आकाशात् इत्यादेरपि ल
क्ष्यतया तत्राव्याप्तिविरहेण तद्वारणाय सद्धेताविति हेतुतावच्छेदकसंबंधेन वृत्तिमतीत्यर्थ इत्याहुः॥ साध्यवद्भिन्नेपः
साध्याभाववानतद्वृत्तित्वमित्यर्थे तु साध्याभाववदित्यस्य व्यर्थत्वापत्तिरित्यत आह मीतत्पुरुषेण व्याचष्टे॥ साध्यवद्भि राम